Shri Raghunath Temple MSS. Library,
JAMMU

No. १५४५

Title कारिकावल्याः सिद्धान्त मुक्तावली टीका

Author म. म. पञ्चानन भट्टाचार्य;

Extent ४६ Age x

Subject न्याय शास्त्रं

कारिकावली सिद्धांतमुक्तावली समाप्ये टीका सहिता

१५४५

९६ प०

४७

[illegible]

80

॥ओं श्रीगणेशाय नमः॥ ओं चूडामणीकृतविधुर्वलयीकृतवासुकिः । भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥१॥ निजनिर्मितकारि-
कावलीमतिसंक्षिप्तचिरंतनोक्तिभिः । विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः ॥२॥ सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्म-
णां ज्ञापिका सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला । विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली विन्यस्ता मन-
सो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥३॥ विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति नूतनजलधररुचये गोपवधूटी-
दुकूलचौराय । तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥१॥ ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनापि मङ्गलं ना-
स्तिकादिग्रन्थे निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र च फलजिज्ञासायाम्
सम्भवति दृष्टफलकत्वे दृष्टफलकल्पनाया अन्याय्यत्वादुपस्थितत्वात् समाप्तिरेव फलं कल्प्यते इत्थं च यत्र मङ्गलं न दृश्यते तत्रापि जन्मा-
न्तरीयमङ्गलं कल्प्यते यत्र च कारणसत्त्वेऽपि समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम् । प्रचुरस्यैव
बलवतो विघ्ननिवारणे कारणत्वं बोध्यम् । विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः । नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धि-
प्रतिभादिकारणकलापात् । न चैवं स्वतःसिद्धविघ्नविरहवता कृतस्य निष्फलत्वापत्तिरिति वाच्यम् । इष्टापत्तेः । विघ्नशङ्कया तदाचरणा-
त् । न च निष्फले शिष्टाचारान्न च तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यम् सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् । अत एव पापभ्रमेण कृ-
तस्य प्रायश्चित्तस्य निष्फलत्वेऽपि तद्बोधकवेदाप्रामाण्यम् । मङ्गलं च विघ्नध्वंसविशेषे कारणम् । विघ्नध्वंसविशेषे च विनायकस्तवपाठा-
दिः । कचित्तु विघ्नात्यन्ताभाव एव समाप्तिसाधनम् प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् । इत्थं च नास्तिकादिग्रन्थेषु जन्मान्त-
रीयमङ्गलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति न व्यभिचार इत्याहुः । संसारेति संसार एव महीरुहो वृक्षस्तस्य
बीजाय निमित्तकारणायेत्यर्थः । एतेनेश्वरे प्रमाणमपि दर्शितं भवति । तथा हि यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकम-
पि न च तत्कर्तृत्वमस्मदादीनां सम्भवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः । न च शरीराजन्यत्वेन कर्तृजन्यत्वसाधके न सत्प्रतिपक्ष इति वा-

नत्विमवधारणे ॥

यद्यप्यत्र त्वात्तपदस्योत्पत्तिमद्भा-
ववाचकत्वात्तयापि पदमनर्थकं
प्रतिभाति तथापि विशिष्टवाच
कानोपपदः । नि. मु. पद्सम
वधाने विशेष्य मात्रपरतायाः
... (margin note continues; illegible in part)
प्रायश्चित्तमयूखः ४८

मंगले ॥

प्रायश्चित्तमयूखः ४८

राम
१

पदजन्यप्रतीतिविषयत्वं पदार्थत्वम्

श्री

ऽम प्रयोजकत्वात् समवेतत्वेन कार्यत्वेन कार्यकारणभावग्रहणानुकूलतर्कः ध्यावाभ्यमीननवयरेवपको विष्णुगोमाभव
पकृतोऽस्मादयप्राग्भावाध्वंसे यथाः इत्थं गुणकर्मसामान्यं सविशेषकम् समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः २
समवेताभावत्वकथनादेव ध्वंसाभावत्वप्राग्म तेनभावत्वेन द्रव्यगुणकर्मसामान्याकृतः एते च पदार्था वैशेषिकप्रसिद्धाः नैयायिकाना
मप्यविरुद्धाः प्रतिपादितं चैवमेव भाष्ये अत एवोपमानचिन्तामणौ सप्तपदार्थभिन्नतया शक्तेः सादृश्यस्य चातिरिक्तपदार्थ
त्वमाशङ्कितम् न च कथमेत एव पदार्थाः शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वात् तथा हि मण्यादिसमवहितेन वह्निना दा
हो न जन्यते तदसमवहितेन जन्यते तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्याद्यपसारणेन च जन्यते इ
ति कल्प्यते एवं सादृश्यमप्यतिरिक्तपदार्थं तद्भिन्नषट्पदार्थवर्तमानभाववति सामान्येपि सत्वात् यथा गोत्वं नित्यं तथाश्वत्वमपीति सादृ
श्यप्रतीतेः नाप्यभावे भिन्नत्वेन प्रतीयमानत्वादिति चेन्न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति मण्याद्यभावांतरेव वा स्वा
तंत्र्येण हेतुत्वं कल्प्यते अनेनैव सामंजस्ये नत्तु शक्तितत्प्रागभावध्वंसकल्पनागौरवात् न चोत्तेजके सति प्रतिबंधकसद्भावे च ।
कथं दाह इति वाच्यम् उत्तेजकाभावविशिष्टमण्यभावस्य कारणत्वात् सादृश्यमपि न पदार्थांतरम् किंतु [illegible]ते
द्भिन्नत्वे सति तद्गतभूयोधर्मवत्वम् यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्वं मुखे चंद्रसादृश्यमिति द्रव्याणि विभजते
क्षित्यप्तेजो मरुद्व्योम कालदिग्देहिनो मनः द्रव्याणि क्षितिः पृथिवी आपो जलानि तेजो वह्निः मरुद्वायुः व्योम आकाशः देही आत्मा
दिक्कालमनांसि प्रसिद्धानि नवद्रव्याणि इत्यर्थः ननु द्रव्यत्वजातौ किं मानम् न हि प्रत्यक्षं तत्र प्रमाणम् रूपतेजःप्रभृति द्रव्यत्वा
ग्रहादिति चेन्न कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया वा द्रव्यत्वजातिसि
द्धेरिति ननु दशमं द्रव्यं तमः कुतो नोक्तं तस्य हि प्रत्यक्षेण गृह्यमाणत्वात् तत्र च रूपवत्वात्कर्मवत्वाच्च द्रव्यम् तच्च गन्धशून्यत्वान्न पृथिवी नील
रूपवत्वाच्च न जलादिकम् तस्य चालोकनिरपेक्षचक्षुःकारणमिति चेन्न आवश्यकतेजोभावेनैवोपपत्तौ द्रव्यान्तरकल्पना

(margin notes: म ; २८ सतिसभ्रुवधानदशाधांच स्वकाण्डी ; अवतीर्णा न ; लोकव्याख्यानमप्रसिद्धतकः ६)

सि॰मु॰ २

वत्ता

पारमार्थ्यत्वात् रूपवत्ताप्रतीतिस्तु भ्रमरूपा कर्मप्रतीतिरप्यालोकापसारणौपाधिकी भ्रान्तिरेव तमसोतिरिक्तत्वे
नन्तावयवादिकल्पनागौरवं स्यात् सुवर्णस्य यथा तैजसत्वं भावलक्षणावसरे गुणान्विभजते अथ गुणा रूपं रसो गन्धस्ततः
परम् २ स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम् संयोगश्च विभागश्च परत्वं चापरत्वकम् बुद्धिः सुखं दुःखमिच्छा द्वेषो य
त्नो गुरुत्वकम् द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ३ एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कण्ठतश्चशब्देन च
दर्शिताः तत्र गुणत्वजातिसिद्धिरग्रे वक्ष्यते कर्माणि विभजते उत्क्षेपणं ततोपक्षेपणमाकुञ्चनं तथा प्रसारणं च गमनं क
र्माण्येतानि पंच च ४ कर्मत्वजातिः प्रत्यक्षसिद्धा एवमुत्क्षेपणादिकमपि ननु भ्रमणादिकमपि पृथक्कर्मणोधिकं तत्कुतो
नोक्तमत आह भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च तिर्यग्गमनमप्यत्र गमनादेव लभ्यते सामान्यं निरूपयति सामान्यं
द्विविधं प्रोक्तं परं चापरमेव च ५ तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वम् अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तम्
नित्यत्वे सतीति नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तमनेकेति नित्यत्वे सत्यनेकवृत्तित्वम
त्यन्ताभावेप्यस्त्यतो वृत्तिसामान्यं विहाय समवेतत्वमुक्तम् एकमात्रव्यक्तिवृत्तिस्तु न जातिः तथा चोक्तम्
व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः रूपहानिरसंबन्धो जातिबाधकसंग्रहः इत्यादिधिकवृत्तित्वसंज्ञाप
रत्वयोच्यते परभिन्ना तु या जातिः सैवापरतयोच्यते द्रव्यत्वादिकजातिस्तु परापरतयोच्यते परत्वमधिकदेशवृत्तित्व
मपरत्वमल्पदेशवृत्तित्वम् सकलजात्यपेक्षया अधिकदेशवृत्तित्वात्सत्तायाः परत्वम् तदपेक्षया चान्यासां जा
तीनामपरत्वम् व्यापकत्वात्परमपि स्याद्व्याप्यत्वादपरमपि च पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्ति
त्वात्परत्वम् सत्तापेक्षया व्याप्यत्वाद्द्रव्यत्वस्यापरत्वम् विशेषं निरूपयति अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः २

दल्पदेशवृत्तित्वा॰१ त्वा॰४

श्र

ष्ट्रेऽवस्थानेवर्त्तते अतः यदपेक्षया विशेषो नास्तीत्यर्थः घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः
परमाणूनां परस्परभेदको विशेष एव स तु स्वत एव व्यावृत्तः तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः समवायं
निरूपयति घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः तेषु जातेश्च संबन्धः समवायः प्रकीर्तितः अवयवावयवि-
नोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोः सम्बन्धः समवायः समवायत्वं नित्यसंबं-
धत्वं तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसंबन्धविषया विशिष्टबुद्धित्वात् दण्डीपुरु-
नत्र इति षविशिष्टबुद्धिवत् इत्यनुमानेन संयोगादिबाधात्समवायसिद्धिः न च स्वरूपसम्बन्धेन सिद्धसाधनमिति वाच्यं
वा अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धिः न च समवायस्यैकत्वे वायौ रूपव-
त्त्वबुद्धिप्रसंगः तत्र रूपसमवायसत्वेपि रूपाभावात् न चैवमभावस्यापि वैशिष्ट्यं संबन्धान्तरं सिद्ध्येदिति वाच्यम् त-
ते स्य नित्यत्वे भूतले घटानयनेऽपि घटाभावबुद्धिप्रसंगात् घटाभावस्य तत्र सत्वात् तस्यानित्यत्वात् अन्या-
न्योन्याभावप्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्वात् मम तु नष्टे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वात्
देशांतरेपि न तद्बुद्धिः वैशिष्ट्यस्यानित्यत्वेन तत्र वैशिष्ट्यकल्पने तवैव गौरवम् इत्थं च तत्कालीनतद्भूतलादिकं
तद्घटाभावयोः सम्बन्धः अभावं विभजते अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः अभावत्वं द्रव्यादिषट्का-
वं. न्योन्याभाववत्त्वम् संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः अन्योन्याभावस्यैकविधत्वात्तद्विभाग-
भावात्संसर्गाभावं विभजते प्रागभावस्तथाध्वंसोप्यत्यंताभाव एव च एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते मे

नास्तिरूपवद्देशपामो

त्रि० मु०
२

सर्गाभावत्वम् अन्योन्याभावभिन्नाभावत्वम् अन्योन्याभावत्वं तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वम्
विनाश्यभावत्वं प्रागभावत्वम् जन्याभावत्वं ध्वंसत्वं नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम् यत्र तु भूतलाद् घटादि
कमपसार्य पुनरानीतं चेत् तत्र घटस्य कालद्वयसंबन्धाद् घटकालादन्यत्राभावस्यानित्यत्वेऽपि घटकालेनात्यन्ताभावबु
द्धिः तत्रोत्पादविनाशशाली च तृतीयोऽयमभाव इति केचित् तत्र ध्वंसप्रागभावाधिकरणे नात्यन्ताभाव इति प्राचां
मतम् श्यामघटे रक्तो नास्तीति धीः प्रागभावं ध्वंसं चावगाहते न त्वत्यन्ताभावम् तयोर्विरोधात् नव्यास्तु
तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेनात्यन्ताभावो वर्तत इत्याहुः नन्वत्यन्ताभावानामधिकरणात्म

कल्पनापेक्षयाऽतिरिक्त

कत्वलाघवादिति चेन्न अनन्ताधिकरणात्मकत्वकल्पनाया एव लघीयस्त्वात् एवञ्चाधाराधेयभावोऽप्युपपद्यते प
वं चैवं भूतले गन्धरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वात्प्रत्यक्षत्वं न स्यात्
एतेन ज्ञानविशेषकालविशेषात्मकत्वमभावस्येति प्रत्युक्तमत्यन्तगौरवापत्तेः इदानीं पदार्थानां साधर्म्यं वैधर्म्यं च वक्तुं।
मुपक्रमते सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते समानो धर्मो येषां ते सधर्माणः तेषां भावः साधर्म्यं समानो ध
र्म इति फलितोऽर्थः एवं विरुद्धो धर्मो येषां ते विरुद्धधर्माणः तेषां भावो वैधर्म्यं विरुद्धो धर्म इति फलितोऽर्थः ज्ञेयत्वं
ज्ञानविषयता साधर्म्यं सर्वेषामस्ति ईश्वरज्ञानविषयतायाः केवलान्वयित्वात् एवमभिधेयत्वप्रमेयत्वादिकं।
बोध्यम् द्रव्यादयः पञ्च भावा अनेके समवायिनः द्रव्यगुणविशेषाणां साधर्म्यमनेकत्वं समवायित्वं च य

कर्मसामान्य:

द्यप्यनेकत्वमभावेऽप्यस्ति तथाप्यनेकत्वे सति भावत्वम् तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्व

२

मितिफलितोर्थः तेन प्रत्येकं घटादावाकाशादौ च नातिव्याप्तिः समवायित्वं च समवायसंबन्धेन संबन्धित्व
व म् न तु समवायित्वं सामान्यं जातेरभावात् समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोर्थः ते
न नित्यद्रव्येषु समवेतत्वाभावेपि नाव्याप्तिः सत्तावन्तस्त्रयस्त्वाद्याः गुणकर्मणोः सत्तावत्त्वमित्यर्थः गुणा द्रव्य
दिर्निर्गुणक्रियः यद्यपि गुणक्रियादिशून्यत्वमाद्यक्षणे घटादावतिव्याप्तम् क्रियाशून्यत्वं च गगनादावति
व्याप्तम् तथापि गुणवद्वृत्तिधर्मवत्त्वं कर्मवद्वृत्तिपदार्थविभाजकोपाधिमत्त्वं च लक्षणार्थः न हि घटत्वादि
कं गुणवद्वृत्ति कर्मवद्वृत्ति वा किन्तु गुणत्वादिकं तथा आकाशत्वादि न पदार्थविभाजकोपा
धिः सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः पारिमा
ण्डल्यभिन्नानां कारणत्वमुदाहृतम् पारिमाण्डल्यमणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः अ
णुपरिमाणं न कस्यापि कारणम् तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् तच्च न संभवति प
रिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात् महतो महत्त्वस्य महत्तरत्ववदणुत्वस्याणुतरत्वप्र नियमा
सङ्गात् एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः इत्थमपि योगिनां प्रत्यक्षे विष
ल॑ + यत्वेन कारणत्वम् ज्ञायमानसामान्यं न प्रत्यासत्तिः ज्ञायमानं लिङ्गं नानुमितिकरणमित्यभिप्रायेणोक्तम्
न त्वकारणत्वं किमत आह अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता कारणत्वं भवेत्तस्य त्रैविध्यं परिकी
र्त्तितम् समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुता एवं न्यायनयज्ञैस्तु तृतीयमुक्तं निमित्तहेतुता।

आत्ममानसप्रत्यक्षे आत्मपरममहत्त्वस्यापि कारणत्वात्परममहत्परिमाणमाकाशादेर्बोध्यं तस्यापि न कार
णत्वमित्याचार्याणामाशयः स्यात् न तु ज्ञानादिरिव प्रत्यक्षकारणता यापवाचाचार्यैरुक्तत्वात् ॥ २

त्वम् यत्समवेतं कार्यं भवति तत्समवायिजनकं तत् तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् तस्या

तुसंयोगस्येति शेषः

कारणत्वम् तत्रेति समवायिकारणे प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः अत्र यद्यपि तरी
तेन संयोगो पटासमवायिकारणं स्यात् एवं वेगादीनामभिघाताद्यसमवायिकारणं स्यादेवं ज्ञानादिक

सि. म.

मिच्छाद्यसमवायिकारणं स्यान्नथापि परेऽसमवायिकारणलक्षणे तदीतन्तुसंयोगादिभिन्नत्वं देयम् त
रीतेन संयोगस्तु तदीयपटसंयोगं प्रत्यसमवायिकारणं भवत्येव एवं वेगादिकमपि वेगस्पन्दनाद्यसमवा
यिकारणं भवत्येव तत्तत्कार्यासमवायिकारणलक्षणे तद्भिन्नत्वं देयम् आत्मविशेषगुणानां तु क्वाप्य
समवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव अत्र समवायिकारणे लक्षणे प्रत्यास
त्तिर्द्विविधम् कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसं
योगादिकं तस्य हि कार्येण घटेन सहैकस्मिन् कपाले प्रत्यासत्तिरस्ति द्वितीयं यथा घटरूपं प्रति क
पालरूपमसमवायिकारणम् तत्र घटरूपं प्रति कारणं घटस्तेन सह कपालरूपस्यैकस्मिन् कपाले प्र
त्यासत्तिरस्ति तथा च क्वचित्समवायसम्बन्धेन क्वचित्स्वसमवायिसमवायसम्बन्धेनेति फलितोऽर्थः
स्यादेवं कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामा

समवायिकार णं

न्यलक्षणं पर्यवसन्नम् आभ्यां समवाय्यसमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः इदा
नीमन्यथासिद्धत्वमेव कियन्तोऽन्यथा वदाह येन सहैव भावः कारणमात्रस्यावश्य अन्यं प्रति पूर्वभावे ज्ञाते य

सर्वभावविज्ञानम्॥ यत्कार्यं प्रति कारणस्य पूर्ववर्त्तित्वं येन रूपेण गृह्यते तेन तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्य-
र्थः यथा घटादिकं प्रति दण्डत्वादिकम् [illegible]मिति द्वितीयमाह यस्य स्वातंत्र्येणान्वयव्यतिरेकौ न स्तः किं तु
कारणमादायैवान्वयव्यतिरेकौ गृह्येते तेन रूपान्यथासिद्धम् यथा दण्डरूपम् तृतीयमाह अन्यं प्रति पूर्ववर्त्तित्वं
गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्त्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् यथा घटादिकं प्रत्याकाशस्य
आकाशस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात् आकाशत्वं हि शब्दसमवायिकारणत्वमेव अतस्तस्य
शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यम् अतस्तदन्यथासिद्धम् ननु शब्दाश्रयत्वेन त-
स्य कारणत्वे कान्यथासिद्धिरिति चेत् [illegible]मीरहाण अथाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चे-
त् कवत्वादिकं विशेषपदार्थो वेति चतुर्थमाह जनकं प्रति पूर्ववर्त्तित्वमपरिज्ञाय न यस्य गृह्यते अतिरिक्तमथा
प्यघटवेविघता [illegible] वश्यकपूर्वभाविनः यत्कार्यजनकं प्रति पूर्ववर्त्तित्वं गृहीत्वैव यस्य तत्कार्यं प्रति पूर्ववर्त्तित्वं गृह्य-
ते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् यथा कुलालपितुर्घटं प्रति तस्य कुलालपितृत्वेन घटं प्रति जनकत्वेऽन्यथा-
सिद्धिः कुलालत्वेन रूपेण जनकत्वे त्विष्टापत्तिः कुलालमात्रस्य घटं प्रति जनकत्वात् पञ्चममाह अवश्य-
क्लृप्तनियतपूर्ववर्त्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः अत एव प्रत्यक्षे महत्त्वं कारणमनेकद्र-
व्यत्वमन्यथासिद्धम् तत्र हि महत्त्वमवश्यं क्लृप्तं तेनानेकद्रव्यत्वमन्यथासिद्धम् न च वैपरीत्ये किं विनिगमक-
मिति वाच्यम् महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् एवं पञ्चान्यथासिद्धा दण्डत्वादिकमादिम-

विनिगमकाभावेन बहूनां वर्ण-
नां कारणतावच्छेदकत्वे गौरवाद्द
र्गनास्य सार्वकालीनत्वाद्वा
विशेषपदार्थो वेति ८ =

अतिरिक्तेति

[illegible]

यद्यपि मु॰ ब॰ ५ 5

म्. घटादौ दण्डरूपादिर्द्वितीयमपि दर्शितम्. तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः पञ्चमो रासभादिः स्यादेतेष्वावश्यक
स्त्वसौ २२ घटव्यक्तिं प्रति रासभस्य नियतपूर्ववर्तित्वमस्ति. तथापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव त — दण्डत्ववत्त्वः दण्डादिभिः
द्व्यक्तेरपि संभवेन रासभोऽन्यथासिद्ध इति भावः. एतेष्विति एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकः
तेनैव परेषां चरितार्थत्वात्. तथाहि दण्डादिभिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे दण्डत्वादिकमन्यथा
सिद्धम्. न चैवं रीत्या किं विनिगमकमिति वाच्यम्. दण्डत्वस्य कारणत्वे दण्डत्वादिघटितपरम्परायाः सम्बन्धत्वकल्पने गौर
वात्. एवमन्येषामप्यनेनैव चरितार्थत्वं सम्भवति. समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्. स्पष्टम्. गुणकर्म
मात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्. असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः।
साधर्म्यमित्यत्र तात्पर्यं. एवं चासमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः. तेन ज्ञानादीनामसम
वायिकारणत्वविरहेऽपि नाव्याप्तिः. अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते. नित्यद्रव्याणि परमाण्वाका
शादीनि विहाय आश्रितत्वं साधर्म्यमित्यर्थः. आश्रितत्वं तु समवायसंयोगान्यतरसम्बन्धेन वृत्तिमत्त्वम्. विशेषण
तया नित्यानामपि कालादौ वृत्तेः. इदानीं द्रव्यस्यैव विशेषसाधर्म्यं वक्तुमुपक्रमते. क्षित्यादीनां नवानां तु
द्रव्यत्वं गुणयोगिता २४ स्पष्टम्. क्षितिर्जलं तथा तेजः पवनो मन एव च. परापरत्वमूर्तत्वक्रियावेगाश्रया
अमी २५ पृथिव्यप्तेजो वायुमनसां परत्वापरत्ववत्त्वं मूर्तत्वं कर्मवत्त्वं वेगवत्त्वं च साधर्म्यं. न च घटा ५
दौ परत्वमपरत्वं वा नोत्पन्नमतोऽव्याप्तिरिति वाच्यम्. परत्वासमानाधिकरणद्रव्यत्वव्याप्यजा।

गुणकर्ममात्रवृत्त्यसमवायिकारणत्वमिति तत्केचात्मगुणे ज्ञानादावव्याप्तेरतो वैधर्म्यपरतयाभ्युक्तम् असमवायिकारणत्वमिति २=

साधर्म्यप्रकरणे वैधर्म्यनिरूपणमयुक्तमत आह अथवेति ८=

अविशेषविभुपरिमाणवत्त्वमित्यर्थः
तेन परिमाणेनातिव्याप्तिः २८

चतुर्थी १=

तिमत्त्वस्य विवक्षितत्वात् मूर्तत्वमपकृष्टपरिमाणवत्त्वं तच्चैतेषामेव गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वा।
भावात्। एवं च कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं च बोध्य
म्। कालखात्मदिशां सर्वगतत्वं परमं महत्। क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि। कालाकाशात्मदि
शां सर्वगतत्वं सर्वमूर्तसंयोगित्वं परममहत्त्वं च परममहत्त्वत्वं जातिविशेषः अपकर्षानाश्रयपरिमाणव
त्त्वं वा। क्षित्यादीति। पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्। अत्र ग्रा
ह्यत्वे विशेषगुणवत्त्वम्। ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यम्। तेन ज्ञानोऽवृत्तिप्रत्यक्षे ज्ञा
नस्याप्युपनीतभानविषयत्वादात्मनि नातिव्याप्तिः। न च प्रत्यक्षविषयरूपादिमति परमाणावा
व्याप्तिः। तस्यापि स्वरूपयोग्यत्वात् महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षम्। पृथ्वात्मादि
विशेषगुणवत्त्वम्। चत्वारीति। पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वं न च द्रव्यानारम्भके दादोषव्या
प्तिः। द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। आकाशशरीरिणाम्। आव्याप्य
वृत्तिक्षणिकोऽविशेषगुणद्रव्यत्वे आकाशात्मनामव्याप्यवृत्ति क्षणिकत्वविशेषगुणवत्त्वं क्षणिकविशे
षगुणवत्त्वम्। आकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः। यदा किञ्चिदवच्छेदेन शब्द उत्पद्यते तदा
न्यावच्छेदेन तदभावस्यापि सत्त्वात्। क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्। योग्यविभु।

पृथिव्यप्तेजोवायूनां स्पर्शवत्त्व
म्। द्रव्यारम्भकत्वं चैषामेवेति। २५

गगनत्वमात्रमात्मा १=

जीवात्म

अयं महानिति प्रतीतिविषयपरम
महत्त्वत्वस्य गगनपरिमाणादिसा।
धारणस्य जातित्वसंभवेऽपि तत्प
रिमाणमयोग्यमिति टीकाकारा
मतमनुसृत्याह अपकर्षेति २८

न च चक्षुरिन्द्रियादिगतरूपादिवि
शेषगुणानामतद्रूपत्वेन बहिरि
न्द्रियग्राह्यत्वाभावाद्वायावव्या
प्तिः आकाशादावाह प्रत्यक्षेति
प्रत्यक्षा २८

यदीदेशावच्छेदेन शब्द उत्पद्यते
तदान्यदेशावच्छेदेन शब्दनाशः २=

विशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः एवं ज्ञानादीनामपि ज्ञानादि
कं हि यदात्मनि विभौ शरीरावच्छेदेनोत्पद्यते तदा तदवच्छेदेन तदभावोऽस्त्येव एवं ज्ञानादिकमपि क्षण
द्वयस्थायि स्त्येव प्रत्यासत्तिविशेषगुणवत्त्वे क्षणिकविशेषगुणवत्त्वं चार्थः पृथिव्यादौ रूपादिरपि विशेषगु
णोऽस्त्येव व्याप्यवृत्तिश्चेत्यत उक्तम् पृथिव्यादावव्याप्यवृत्तिः संयोगादिरस्तीति विशेषगुणेत्युक्तम् न च रूपादीनां
मु॰व॰ ६ कदाचित्तृतीयक्षणे नाशसम्भवात् क्षणिकविशेषगुणवत्त्वं पृथिव्यादावप्यस्तीति वाच्यम् चतुःक्षणवृत्तिज
मात्रवृत्तिजातिमद्विशेषगुणत्वस्य च तदर्थत्वात् अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतुष्टये तु न किमपि ज्ञा
नादिकं तिष्ठति रूपत्वादिकं तु क्षणचतुष्टयस्थायिष्वपि रूपादिष्वस्तीति तत्र युक्ताः ईश्वरज्ञानस्य चतु
तः क्षणवृत्तित्वात् ज्ञानत्वस्य तद्वृत्तित्वात् जन्येत्युक्तम् यद्वा आकाशजीवात्मनोः साधर्म्यं तदा जन्येति न देयम्
द्वेषत्वादिकमादाय लक्षणसमन्वयात् परममहत्त्वसमानाधिकरणगुणत्वावच्छिन्नार्थे लक्षणे द्वित्वादीनां नाशाभ्यु
पगमाद्द्वित्वादीनामपि तथात्वोद्धारणाय विशेषेति त्रिक्षणवृत्तित्वं वाच्यम् इच्छात्वादिकमादाय लक्ष
णसमन्वयात् रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः पृथिव्यप्तेजसां रूपवत्त्वे द्रवत्वे प्रत्यक्षवि
षयत्वे चेत्यर्थः न च चक्षुरादीनां भर्जनकपालस्थवह्नेरूष्मणश्च रूपवत्त्वे किं मानमिति वाच्यम् त
त्रापि तेजस्त्वेन रूपानुमानात् एवं चक्षुरादीनां पृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रू। ६

पाकजमात्रं बोध्यम् नच गुरुत्वादौ द्रुतसुवर्णलोहादिभिन्ने तेजसि च द्रवत्वमव्याप्तमिति वाच्यम् द्रवत्ववद्वृत्तिद्रव्यत्व
व्याप्यजातिमत्त्वस्य विवक्षितत्वात् एतेन तदप्यपास्तं त्रिषु पृथिवीषु जलेषु गुरुत्वं स्वर्णादौ तेजसि च द्रवत्वं सत्त्वा
च्च पृथिवीत्वादिमत्त्वान्न दोषायेत्यर्थः सर्वेन्द्रियलक्षणमसमन्वयः नच प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तम
तिव्याप्तं च रूपादाविति वाच्यम् बाह्यप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्
आत्मन्यतिव्याप्तिवारणाय बाह्येति गुरुणी द्वे रसवती गुरुत्ववत्त्वं रसवत्त्वं च पृथिवीजलयोरित्यर्थः
दीनं: नच गुरुत्वेऽतीन्द्रियाणां वायवानीतपार्थिवादिभागानां चरमादिमत्त्वे किं मानमिति वाच्यम् तत्रापि पृथि
वीत्वादिना तदनुमानात् द्वयोर्नैमित्तिको द्रवः पृथिवीतेजसोरित्यर्थः नच नैमित्तिकद्रवत्वं घटादौ
वह्न्यादौ चाव्याप्तमिति वाच्यम् नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षित
त्वात् आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमि
त्यर्थः यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् स्नेहत्वादिकं विहायेति बोध्यम् तत्र न कस्यापि वैध
र्म्यं केवलान्वयित्वात् स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं ते
जसो गुणाः स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकम् रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश बुद्ध्यादिष स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ग
ट्कं संख्यादिपञ्चकं भावना तथा धर्माधर्मौ गुणा एते चात्मनः स्युश्चतुर्दश संख्यादिपञ्चकं कालदि
शोः शब्दश्च ते च खे संख्याद्याः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे परापरत्वे संख्यादिपञ्च वेगश्च मानसे वा

मु॰व॰
२

योर्नवैकादशतेजसोगुणाजलक्षितिप्राणभृतांचतुर्दश दिक्कालयोःपंचषडेवचांबरेमहेश्वरेष्टौमनस
स्तथैवच तेचसंख्यादयः पंचबुद्धिराकाशे साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकंपृथिव्यादिकंनिरूपयति
तत्रेति क्षितिर्गंधहेतुर्नानारूपवतीमता गंधसमवायिकारणमित्यर्थः यद्यपिगंधवत्त्वमात्रंलक्षणमु
चितं तथापिपृथिवीत्वजातौप्रमाणोपन्यासायकारणत्वमुपन्यस्तम् तथाहि पृथिवीत्वंगंधस
मवायिकारणतावच्छेदकतयासिद्ध्यति अन्यथागंधत्वावच्छिन्नस्याकस्मिकत्वापत्तेः नचपाषा
णादौगंधाभावादव्याप्तमिति वाच्यम् भस्मनोहिपाषाणध्वंसजन्यत्वात्पाषाणोपा
दानोपादेयत्वंसिध्यति यद्द्रव्यंयद्द्रव्यध्वंसजन्यंतत्तदुपादानोपादेयमिति व्याप्तेः इदंचैतत् खण्डप
टेमहापटध्वंसजन्ये घटध्वंसजन्यमहाघटध्वंसजन्येमिथ्यात्वानद्ध्वंसजन्यकीयकपालेऽव्यभिचारवारणाय
द्रव्यपदं द्रव्यंव्याप्तिशरीरेनिविष्टम् द्रव्यंचपाषाणपरमाणोः पृथिवीत्वात्तज्जन्यपाषाणस्यापिपृथि
वीत्वं तथाचतस्यापिगंधवत्त्वेबाधकाभावः नानारूपेति शुक्लनीलादिभेदेननानाजातीयंरूपंपृथि
व्यामेववर्त्तते नतुजलादौ तत्रशुक्लस्यैवसत्त्वात् पृथिव्यांत्वेकस्मिन्नपिधर्मिणिपाकवशेननानारूप
संभवात् नचनानारूपवत्त्वेतत्राव्याप्तिः रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य [illegible]
[illegible] रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यवाविवक्षितत्वात् वैशेषि
कनयेपृथिवीपरमाणौरूपनाशस्यरूपांतरस्यचसत्त्वात् न्यायनयेघटादावपितत्सत्त्वात्लक्षण
ढः तत्रापिगंधसत्त्वात् अनुपलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते कथमन्यथातद्दंनिगंधउपलभ्यते

ध्वंसजन्यत्वंचाहृष्टाद्वारकंविवक्षितम् शालिग्रामध्वंसजन्येनारकीटशरीरेव्यभिचारः=

द्रव्यत्वव्याप्यजलत्वादिमति २=

रूपद्वयवद्वृत्तिसत्ताद्रूपजातिमतिशुणादावतिव्याप्तिरतोद्रव्यत्वव्याप्येति जलादावतिव्याप्तिरतोरूपद्वयवद्वृत्तीति जलपृथिव्यन्यतरत्वादिरूपधर्ममादायजलादावतिव्याप्तिरतोजातीति २=

गंधवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं तदर्थः २=

भस्मपृथिवीगंधवत्त्वात् भस्मावयवाः पृथिवीपृथिवीसमवायिकारणत्वात् पाषाणःपृथिवीपृथिवीसमवायिकारणकत्वात् पाषाणोगंधवान्पृथिवीत्वात्॥=

अपेक्षाबुद्धिविशेषविषयत्वरूपद्वित्वादिघटितत्वेनगौरवादाह रूपनाशेति २=

म्म

समन्वयः । इन्द्रियस्त्वरसस्तु गन्धोपि द्विविधो मतः मधुराम्लकटुकषायादिभेदेन यः षड्विधो रसः स पृ
थिव्यामेव जले मधुर एव रसः अत्रापि पूर्ववद्रसत्वजातिसिद्धिप्रत्यक्षत्वव्याप्यजातिमत्त्वं लक्षणार्थो बोध्यः गन्धः
त द्विविधः इति घ्राणेन्द्रियग्राह्यमात्रेण गन्धत्वमिति लक्षणं द्विविधस्पर्शवर्णत्वात् द्वैविध्यं च सौरभासौ
रभभेदेन ज्ञेयम् स्पर्शस्त्वगिन्द्रियमात्रविशेषो यथानुष्णाशीतपाकजः तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्वे
पृथिव्याः स्पर्शो वायावपि वर्तते इत्यत उक्तं पाकजेति इत्थं चैवमनुष्णाशीत[illegible]रिति ज्ञापनार्थमेवकृतम् पाकजस्पर्शवत्व।
मात्रं लक्षणम् अधिकस्यैव व्यर्थत्वात् यद्यपि पाकजः स्पर्शः घटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्ति
द्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा अनित्या तु तदन्यास्या
सैवावयवयोगिनी सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा पृथिवी द्विधा नित्यानित्या चेत्यर्थः अणु
लक्षणा परमाणुलक्षणा पृथिवी नित्या तदन्या परमाणुभिन्ना पृथिवी घ्राणुकादिः सर्वाप्यनित्येत्यर्थः
सैवानित्या पृथिवी अवयववतीत्यर्थः ननु अवयविनि किं मानम् न च परमाणूनामतीन्द्रियत्वाद्घटा
देः प्रत्यक्षत्वं न स्यादिति वाच्यम् एकस्य परमाणोरप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वात् यथा एककेश
स्य दूरे अप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वम् न च एकस्मिन् घट इति बुद्धेरनुत्पत्तिरिति वाच्यम् एको म
हान्धान्यराशिवदुपपत्तेः नैवम् परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगात् दूरस्थके
शस्तु नातीन्द्रियः सन्निधाने प्रत्यक्षत्वात् न च तदानीं द्व्यणुकपरमाणुपुञ्ज एको महत्त्वावच्छिन्नः प्रत्यक्षत्वेपि वि।

पाकजस्पर्शवत्वमात्रोक्तौ च ५=

आदिना वै[illegible]अकमनेवयविमा
त्रपरिग्रहः ६= सत्तारूपजातिमा
दायगुणत्वेपि वतिव्याप्तिरतोद्र
व्यत्वव्याप्येति द्रव्यत्ववतिस
त्तामादाय अतिव्याप्तिरतो रो
व्याप्तिभागः स्पर्शवति जल
त्वादिकमादाय जलादावति
व्याप्तिरतः पाकजेति पाकज
द्रवत्ववति तेजस्त्वमादाय ते
जस्यतिव्याप्तिरतः स्पर्शेति ६=
[illegible]तिव्याप्तिवारणा
यजातीति = ६
जलस्पर्शव्यावर्तनार्थं ०८

रिति ॥ २ तस्यैव ॥ परमाणुपुञ्जैरेवोपपत्तेः ॥ ५

कारणगुणपूर्वकत्वात् ॥

मु. ८

घटइत्यादिसनीति विषयता घ्राणानेक परिमाणद्व्यणुकत्वपणेगौरवादिति रिक्तात्व यवसिद्धिः ॥

रोध इति वाच्यम् अद्रव्यस्य द्रव्यानुपादानत्वात् अन्यथा चक्षुस्पर्शादिसंततौ कदाचिद्द्रव्यत्वप्रसंगात् नचानित्य
स्नेहलासैकद्व्यमहद्द्रव्यारम्भसंतते द्रव्यारम्भोऽस्त्विति वाच्यम् तत्र तदन्तःपातिभिर्द्रव्यैरवयवैः स्थूलद्र
व्योत्पत्तेरुपगमात् नचाद्रव्येन द्व्यणुकेन कथं द्रव्यत्रसरेणोरुत्पत्तिरितिवाच्यम् यतोऽनवयवं द्रव्यत्वमद्रव्यत्वे
वा कस्यचित्स्वभावादायत्तं किंतु महत्त्वोद्भूतरूपादिकारणसमवायवशात् द्रव्यत्वं तदभावे चाद्रव्यत्वं ता आदिना आलोकपरिग्रहः
वच त्रसरेणोर्महत्त्वात्सावयवत्वं न तद्व्यणुकादेस्तदभावात् नहि त्वन्मतेपीदृशं भवति परमाणोर्महत्त्वाभावात्
इत्थं चावयवविनिवृत्तिसिद्धौ तेषामुत्पादविनाशयोः समवत्वात् निरवयवत्वे तेषां चावयवावयवधारा यास्त्वनन्तत्वे
मेरुसर्षपयोरपि साम्यप्रसंगः अतः क्वचिद्विश्रामो वाच्यः यत्र च विश्रामस्तस्यानित्यत्वे तत्समवेतकार्या
पत्तिप्रसंगः स्यात् तस्मात्तस्य नित्यत्वं महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमित्व अणुपरिमाणतारतम्य
स्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः नचत्रसरेणावेव विश्रामोऽस्त्विति वाच्यम् त्रसरेणोः
सावयवद्रव्यारब्धत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवा सावयवा महदवयवत्वा
व त्कपालवदित्यनुमानेन तदवयवत्वसिद्धिः नचैतं महदयोजकं अपकृष्टमहत्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वा
त् नचैवं क्रमेणावयवावयवधारापि सिद्धेरितिवाच्यम् अनवस्थाभयेन तदसिद्धेः सा च त्रिधा भवे
ति सा कार्यरूपा पृथिवी त्रिधा शरीरेन्द्रियविषयभेदादित्यर्थः तत्र देहमुदाहरति योनिजादिभवेद्देहम्
मिन्द्रियं घ्राणलक्षणं विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः योनिजमयोनिजं चेत्यर्थः योनिजम ८

४ शरीरत्वं न जातिः पृथिवीत्वादिना साङ्कर्यात् किं तु चेष्टाश्रयत्वं हस्तादीनामपि चेष्टाश्रयत्वात् व्याप्तिः न च हस्तादीनां ४ ६=

तथापि तर्हि जलत्वपृथिवीत्वादिना सङ्करप्रसंगात् ४

आदिना पक्षमशकादीनां ग्रहः ६:१=

पिहितविधं जरायुजमण्डजं चेति जरायुजं मनुष्यादीनां अण्डजं सर्पादीनां अयोनिजं स्वेदजोद्भिज्जादीनां स्वे

दजाः कृमिदंशाद्याः उद्भिज्जास्तरुगुल्माद्याः नारकिणां शरीरमयोनिजं न च मनुष्यादिशरीराणां पार्थिवत्वे किं

मानमिति वाच्यम् गंधादिमत्त्वस्यैव प्रमाणत्वात् न च स्वेदोष्मदेहपलेभाद्याप्यत्वादिकं स्यादिति वाच्यम् नो

ष्मासलिलतत्वादिमासंकरप्रसंगात् न च तर्हि जलत्वादिकमेवास्तु न तु पार्थिवत्वादिकमिति वाच्यम् स्वे

वि५ दकादीनां नाशेपि शरीरत्वेन प्रत्यभिज्ञानात् गंधाद्युपलब्धेश्च पृथिवीत्वसिद्धेः तेन पार्थिवादिशरीरे

नलादीनां निमित्तत्वमात्रे वोध्यम् शरीरत्वे किं मानमिति वाच्यम् आध्यात्मिकवायुसंबंधस्य प्रमाणत्वात्

नचैवं किं मानमिति चेन्न प्रयत्नवत्संयोगेनाद्विनातत्वेनयनात् यष्टिहस्तादौ शरीरव्यवहारो न भवति तद

न्त्यावयवित्वेन तद्विशेषणीयं न च यत्नवच्छरीरचेष्टा न जातं तत्राव्याप्तिरिति वाच्यम् तादृशप्रमाणाभावा

त् अथवा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं तत् अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिम

त्त्वं वा तच्च मनुष्यत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः न च नृसिंहशरीरे गणपतिशरीरे वा कथमेतल्ल

क्षणसमन्वयः तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावात् न लीयते न च शरीरवृत्तितया देवत्वस्या

पि जातित्वाभावादिति नलीयते न च शरीरवृत्तितया देवत्वं तु ति वाच्यम् कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्व

जात्या लक्षणसमन्वयात् इंद्रियमिति घ्राणेंद्रियं पार्थिवमित्यर्थः पार्थिवत्वे कथमिति चेदित्थम् घ्राणेंद्रि

आदिना देवादिशरीरग्रहः तद्धरीरा णां मनुष्यत्वे ऽपि मांदिविशेषसहितेभ्यो ऽणुभ्यः पक्षिकादिति भावः तेषामयोनिजत्वे चागम एव प्रमाणम् ब्रा ह्मणो मानसाः पुत्राः मन्वादयः इत्यादि प्रमाणं योनिं विनानशरीरमि

व्यूहावकाशपरिग्रहः क्रियावकाशो मनुष्याणां तादृग्त्वप्रतिवन्धः

आदि पदं कारणमात्रपरं शरीरपदं वा मनुष्यदेहपरम् १=

शरीरस्य पार्थिवत्वसाधनेन

न तु प्रयत्नवत्संयोगेहस्तादेरव्याप्तेः प्रमाणत्वे किं मानमिति चेन्न नर्मदातीरसंजाताः ससिलाः कन पादपाः नर्मदातोयसंस्पर्शात्ते यान्ति परमां गतिम् इत्यादौ कल्पतरु त्वविप्रतिपत्तिः अतः आरण्ये निर्जले देशे भवति ब्रह्मराक्षसः इत्यागमस्यैव तत्र प्रमाणात् ७=

आदिना वृद्धिसंग्रहः आध्यात्मिकवायुसंबंधात्रुमितेः ७=

मतशरीरादावव्याप्तिरत उक्तं चेति यद त्वमाद्यपदे तिव्याप्तिरतश्चेष्टावदि ति हस्तादावतिव्याप्तिवारणाय अन्त्यावयवीति ५=

अपिना नृसिंहत्वग्रहः २=

न तु देवत्वादिरूपजातिमादाय लक्षणसमन्वयः अतएव २=

न च हस्तत्वादिकं न जातिः पृथिवीत्वादिना सङ्करादिति वाच्यम् पृथिव्यादिव्याप्यनानाहस्तत्वादिकाङ्गात् पृथिवीत्वव्याप्यतादृशजातिमत्त्वे ऽतिव्याप्तेर्लक्षणान्तरमाह अन्त्यावयवीति अन्त्यावयवमात्रवृत्तित्वेनेन द्रव्यात्वजातिव्युदासः चेष्टावद्वृत्तेनेन पटादिव्युदासः चेष्टा च हिताहितप्राप्तिपरिहारार्थक्रिया ५=

दायदगादा ३

शुक्लरूपस्य लक्षणत्वे पिनद्धत्यपि प्रेत्याह अप्यवेति वायावतिव्याप्तिवारणाय रूपवद्वृत्तीति तेजसादावतिव्याप्तिवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति पटत्वादिवारणाय साक्षादिति द्रव्यत्वसाक्षाद्व्याप्यत्वे द्रव्यत्वव्याप्यव्याप्यत्वमात्र न तद्व्याप्यस्य व्याप्यत्वस्यापि तत्त्वात भावः रूपवद्वृत्तिविशेषणेनैव रूपादीनां वारणायतन्निवेशप्रयोजनाभावात्

यं पार्थिवं ... अर्थः रूपादिषु पंचसु मध्ये गंधस्यैवाभिव्यंजकत्वात् कुंकुमगंधाभिव्यंजकघृतादिवत् न च दृष्टांते स्वकी
यरूपादिव्यंजकत्वात् साध्यसिद्धिरिति वाच्यम् परकीयरूपाद्यव्यंजकत्वस्य तदर्थत्वात् न च शरावगंधव्यंजकजलेना
नैकांतिकमिति वाच्यम् तस्य सक्तुरसाभिव्यंजकत्वात् यद्वा परकीयेति न देयं वायूपनीतसुरभिभागस्य दृष्टां
तत्वसंभवात् न च घ्राणेंद्रियसन्निकर्षस्य गंधमात्रव्यंजकत्वात् व्यभिचार इति वाच्यम् द्रव्यत्वे सतीति वि
शेषणात् विषय इति उपभोगसाधनं हि विषयः सर्वमेव हि कार्यजातमदृष्टाधीनं यच्च कार्यं यददृष्टाधीनं
तदुपभोगसाक्षात्परंपरया जनयत्येव न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन द्व्यणुकादिकं
प ब्रह्मांडांतं सर्वमेव विषयो भवति शरीरेंद्रिययोर्विषयत्वे विप्रकारांतरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः ज
लं निरूपयति वर्णः शुक्लोऽस्य स्पर्शो जलेऽस्य मधुरः शीतलौ रसस्य समानाधिकरणतावच्छेदकतया जलत्वजातिः सि
ध्यति यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यम् अणुपरमाणौ जलत्वे
नुमानाज्जन्यस्नेहाभावात् तस्य च स्वरूपयोग्यत्वेन नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनियम इति चेन्न जन्या
स्नेहजनकतावच्छेदकतया जन्यजलत्वजातिसिद्धौ तज्जनकतावच्छेदकतया जलत्वजातिसिद्धिः शुक्लरूपमेव
जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति न च शुक्लरूपवत्त्वं लक्षणं अप्यवा नैमित्तिकद्रवत्ववद्वृत्तिशुक्लरू
पवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः तेन स्फटिकादौ नातिव्याप्तिः प्रभास्वरशुक्लेतररूपासमाना

न च घ्राणस्य गंधाभिव्यंजकजलेऽपि रसव्यंजकतावच्छेदकजलत्वसत्त्वात् ३

मु.व.
८

9

निरवच्छिन्नधर्मस्य कार्यतावच्छेदकत्वाभावेन स्नेहत्वस्य कार्यतावच्छेदकत्वं न संभवतीति शंकते यद्यपीति वस्तुतस्तु नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावान्न ... वदं न देयमेव ५

लाघवादाह यद्वेति २

द्व्यणुकादिकार्यस्य तत्तदुपभोगसाधनत्वेन ६
इति ... निरूपणम्॥
केचित्तु स्नेहादिकं प्रत्येव ... धनादेः कारणत्वं निर्वाह्यम् आर्द्रीधनत्वं जलसंयुक्तत्वं तथा च जलसंयुक्तेंधनत्वेन न संयुक्तजलत्वेन वा द्रव्यत्वविशिष्टमनादि रूपेण जलेंधनयोः ... कारणतावच्छेदकतया जलत्वजातिसिद्धिरित्याहुः परे तु स्वयूलजलस्य ... जलत्वे रूपजात्यवच्छिन्नस्य ... तावद्धिकरणतावच्छेदकत्वे ... तदभावात् नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावाच्चेत्याहुः ७

ननु यथा रूपस्य देहोत्थफलानुपधायकेकारणतावच्छेदकतया दण्डत्वादिकं जातिस्तथात्राप्यभिषिच्यतीत्यत आह तस्येति स्ने
हः स्वरूपयोग्यतायां न कापि नक्षतिः तस्य नित्यत्वेन फलोपधायकाभावात् ४

पृथिवीत्वमादाय पृथिव्यामतिव्याप्तिवारणाय गुणांतम् जलत्वस्य शुक्लरूपसमानाधिकरणत्वाद संभव इति शुक्लेतरेति तेजस्यतिव्याप्तिवारणाय भास्वरेति १

नित्यनवनिन्ननामे २

सूत्रनाथकर

रसस्पर्शाविति जलस्य मधुर एव रसः शीत एव स्पर्शः तिक्तत्ववद्वृत्ति मधुरवद्वृत्तिरसत्वसाक्षाद्व्याप्यजातिमत्त्वं मधुररसवत्त्वम्
र्थः तेन शर्करादौ नातिव्याप्तिः २५ दर्शितसम्बन्धस्य नीलप्रतीति नियामकत्वादेव ४=

धिकरणत्वव्यापकवद्वृत्तिरसत्वसाक्षाद्व्याप्यजातिमत्त्वं शीतेतरस्पर्शवद्वृत्ति शीतस्पर्शवद्वृत्तिरसत्वसाक्षाद्व्याप्यजातिमत्त्वं
वा तदर्थः मधुररसवत्त्वं ... तेन शर्करादौ नातिव्याप्तिः नव्यास्तु रूपमेवेति कुतः कालिन्दीजलादौ नीलिमो
पलब्धेरिति चेन्न नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावात् जले नीलरूपासम्भवात् कालिन्दीजले
नीलत्वप्रतीतिस्त्वाश्रयोपाधिकी अत एव वियति विक्षेपे धवलिमोपलब्धिः ननु जलमाधुर्ये किं मानम् न
हि पतद्गोलकेपि रसस्तत्रानुभूयते नवनालिकेरजलादौ माधुर्यमुपलभ्यत एवेति वाच्यम् तस्याश्रयोपा
धिकत्वात् जम्बीरकरवीरादावुपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न हरीतक्यादिभक्षणस्य जल
रसव्यञ्जकत्वात् न च हरीतक्यामेव जलोष्मसंयोगान्मधुरोपलब्धिरिति वाच्यम् कल्पनागौरवात् पृ
थिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जलेनाम्लादिके जम्बीररसादौ त्वाश्रयोपाधिकीतत्प्रतीतिः पृ
वर्त्तमानशीतस्पर्शजनकतावच्छेदकं जलत्वं तत्र जलत्ववाचाच्यम् तृषितं नादौ शैत्योपलब्धिस्तत्र तद्विधि
शीतस्पर्शवद्रसस्य तेजःसंयोगाज्जलेऽस्य तत्प्रतीतिरौपाधिकी स्यादेव तत्पाकासम्भवात् स्नेहस्तत्र
द्रवत्वं तत्सांसिद्धिकमुदाहृतम् घृतादावपि तरं न वर्तिजलस्यैव स्नेहः जलस्यैव स्नेहसमवायिकारणत्वा
त् तेन जलस्यैव स्नेह इति मन्तव्यम् द्रवत्वमिति सांसिद्धिकद्रवत्वव्याप्तिविशेषः प्रत्यक्षसिद्धस्नेहद्रवत्वे किञ्च
जनकतावच्छेदकमपि तदेवेति भावः तैलादावपि जलस्यैव स्नेहः प्रकर्षेण घटस्नानार्हत्वमिति वक्ष्यते

जलत्वं १ द्रवत्वं

स्वसमवायिसंयोगसंबन्धेनोपष्टंभ कपाष्ठिवद्भागगतनीलरूपप्रतीति कालिन्दीजलादौ इति भावः ४=

आश्रयोपाधिकत्वाभावे ६=

हरीतक्यादिभक्षणोत्तरं प्रत्यक्षेण मधुरोपलंभात् ७= नन्वत्र जले मधुरो रसः तथापि नारिकेलजलादौ म्लरसस्य प्रत्यक्षसिद्धत्वादह पृथिवीत्वस्येति ६= यद्यपि पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वमप्यस्ति तुल्यं तथापि हरीतकीभक्षणोत्तरं जलेपि मधुरोपलब्धेः तत्र मधुरस्वीकारस्यावश्यकत्वाज्जलत्वेनापि मधुरं प्रति हेतुत्वकल्पनमिति भावः ६=

न तु नीलरूपाभावे कथं नीलरूपप्रतीतिर्जले अत आह कालिन्दीति ३=

जलत्वजातावनुमानं तदंशप्रमाणमाह एवमिति ८=

अवयवरसजन्यस्य पृथिवीरसस्याग्निसंयोगसाध्यत्वं हरीतक्यादेरवयवमात्रेण तुल्यसंयोगाभावेपि पृथिवीरसोत्पादकत्वस्वीकारे अतिरिक्तकार्यकारणभावस्य हरीतक्यां मधुररसस्य कल्पने गौरवात् ७=

सि.मु.
१०

नित्यत्वादिप्रथमे किंत्वत्रेदमयोनिजं इंद्रियं रसनं सिंधुर्हिमादिर्विषयो मतः पृथिव्या इवेत्यर्थः तथाहि जलं
द्विविधं नित्यमनित्यं च परमाणुरूपं नित्यम् द्व्यणुकादिकं सर्वमनित्यं अवयवसमवेतं चानित्यमपि त्रिविधं
शरीरेंद्रियविषयभेदात् पृथिवीतो यो विशेषस्तमाह किंत्विति अयोनिजमेवेत्यर्थः जलीयशरीरमयो
निजं वरुणलोके प्रसिद्धमिति इंद्रियमिति जलीयमित्यर्थः तथाहि रसनेंद्रियं जलीयं गंधाद्यव्यंजकत्वे सति रस
व्यंजकत्वात् सक्तुरसाभिव्यंजकोदकवत् [illegible] भागवत्त्व रसनेंद्रियसन्निकर्षाव्यभिचारवारणा
य द्रव्यत्वे इत्यपि विषयं दर्शयति सिंधुर्हिमादिरिति सिंधुः समुद्रः हिमं तुषारः आदिपदात् सरित्कासारकरकादिः
सर्वोऽपि ग्राह्यः न च हिमकरकयोः कठिनत्वात् पार्थिवत्वमिति वाच्यम् उष्णेन विलीनयोस्तयोर्जलत्वस्य प्रत्यक्ष
सिद्धत्वात् यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः अदृष्टविशेषेण द्रवत्वप्रतिरोधात् क
रकादौ काठिन्यप्रत्ययस्य भ्रांतत्वात् तेजो निरूपयति स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लं भास्वरं उष्णत्वं स्प
र्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः इत्थं च तन्मात्रोष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषस्त
स्य परमाणुवृत्तितेन तन्मात्रोष्णस्पर्शसंबंधेन चोष्णस्पर्शवत्त्वं चेत् किरणादावव्याप्तिरिति वाच्यम् तत्राप्युष्णस्पर्श
सत्त्वात् किंतु तदंतःपातिजलस्पर्शेनाभिभवात् अनुद्भवः एवं चंद्रकिरणादौ पार्थिवस्पर्शेनाभिभवादनुद्भवः रादा
वनुद्भूतत्वाच्च न रूपवत्त्वः रूपमित्यादि सुवर्णादौ [illegible] किरणादौ पार्थिवरूपेणाभिभवादनुद्भूतरूपत्वं न रूपाभावः ।

ला२ ते

१०

रूपाद्यदेधर्मिणोपिचाक्षुषत्वेनस्यादितिचेन्न प्रमतीत [illegible] द्वधर्मिणो गरसम्भवात् शङ्खस्येवपिष्टपीतिम्ना
प्रमेरेला [illegible] रूपंनाभिभूतंकिंतुतदीयशुक्लत्वमभिभूतमित्यर्थः नैमित्तिकंद्रवत्वंतैलनित्यतादिचतुर्ष्वेवेत् पृ।
नच॰ सव [illegible] द्रूपेतेजसितत्सत्वात् नैमित्तिकद्रवत्वंनलतणोरस्नेहनादावव्याप्तंतादावतिव्याप्तमितिवाच्यम् पृथि
व्यादिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वस्यविवक्षितत्वात् नित्यता जलस्यैवेत्यर्थः तथा
हि तद्द्विविधम् नित्यमनित्यंच नित्यंपरमाणुरूपंतदन्यदनित्यमवयविच तच्चत्रिधा शरीरेन्द्रियविषय
भेदात् शरीरमयोनिजमेव तच्चादित्यलोकादौप्रसिद्धम् प्रत्ययोविशेषस्तमाह इन्द्रियंनयनंवह्निस्वर्णा
दिर्विषयोमतः चक्षुस्तेजसंपरकीयस्पर्शाद्यव्यंजकत्वेसतिपरकीयरूपव्यंजकत्वात् प्रदीपवत् प्रदी
पस्यस्वीयस्पर्शव्यंजकत्वात् प्रथमंपरकीयेति चन्द्रादेःस्वीयरूपव्यंजकत्वात्तद्व्यभिचारवारणायद्वि
तीयंपरकीयेति अप्रवाप्रभायाद्दर्शनत्वसंभवाद्यंपरकीयेतिनदेयम् चक्षुःसन्निकर्षेव्यभिचारवा
रणायद्रव्यत्वंदेयम् विषयंदर्शयति वह्नीति ननुसुवर्णस्यतैजसत्वेकिंमानमितिचेन्नसुवर्णंतैज
सम् असतिप्रतिबन्धकेत्यन्तानलसंयोगेप्यनुच्छिद्यमानद्रवत्वात् यन्नैवंतन्नैवं यथापृथिवीति
नचाप्रयोजकं पृथिवीद्रवत्वस्यजलद्रवत्वस्यचाग्निसंयोगनाश्यत्वात् ननुपीतिमगुरुत्वाश्रय
स्यपार्थिवस्यापितदानींद्रुतत्वात्तेनव्यभिचारइतिचेन्न जलमध्यस्थमसीतोद्रवत्वस्याद्रवत्वात् प

सप

पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तः अत्यंताग्निसंयोगेपि २=

परेत्वपीतिमाश्रयस्यात्यंताग्निसंयोगेपि रूपापरावृत्त्यदर्शनात्तत्प्रतिबंधके विजातीयद्रवद्रव्ये कल्प्यते तथाहि
अग्निसंयोगेपि पूर्वरूपविजातीयरूपानधिकरणत्वात् जलमध्यस्थपीतपटवत् तस्य पृथिवीजलभिन्नस्य
तेजस्त्वनियमात् वायुं निरूपयति अपाकजोनुष्णाशीतस्पर्शस्तद्वत्त्वेनमतः तिर्यग्गमनवानेष ज्ञेयः स्पर्शादि
लिंगकः एवंवह्नित्वतायुक्तं देहमापितवानिदंयम् अनुष्णाशीतस्पर्शे पृथिव्यामपि सत्वादुक्तमपाकज इति अपा
कजस्पर्शस्य जलादावपि सत्वादुक्तमनुष्णाशीतेति एतेन वायोर्विजातीयस्पर्शो दर्शितः तज्जनकतावच्छेद
कं वायुत्वमिति भावः एष वायुः स्पर्शादिलिंगकः वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते विजातीयस्पर्शेन
विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कंपेन च वायोरनुमानात् यथा च वायुर्न प्रत्यक्षस्तथाग्रे वक्ष्य
ति एवंवदिति वायुर्द्विविधः नित्योनित्यः परमाणुरूपो नित्यः तदन्योनित्यः समवेतश्च सोपि त्रिविधः शरी
रेंद्रियविषयभेदात् तत्र शरीरमयोनिजं पिशाचादीनां परंतु जलीयतैजसवायवीयशरीराणां पार्थिवभा
गोपष्टंभकत्वादुपभोगक्षमत्वम् जलादीनां प्राधान्याज्जलीयत्वादिकमिति इंद्रियो विशेषस्तमाह देहव्यापीति
शरीरव्यापकमिंद्रियं स्पर्शग्राहकं त्वक् तच्च वायवीयं रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभिव्यंजकत्वात् अंगसंगि
सलिलशीताभिव्यंजकव्यजनपवनवत् विषयं दर्शयति प्राणादिस्तु महावायुपर्यंतो विषयो मतः आकाशं
निरूपयति आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः आकाशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकं न
यद्यप्यनित्यो वायुस्त्रिविधस्तथापि चतुर्विधः प्राणादिरित्युक्तम् ... प्राणस्त्वेक एव हृदादिनानास्थानवशा
न्मुखनिर्गमादिनानाक्रियावशाच्च नानासंज्ञां लभत इति ३

म बे.
११

अनुष्णाशीतस्पर्शवत्त्वं वायोर्लक्षणम् ... स्पर्शः सकलविशेषितः स्पर्शत्वात् पृथिवीस्पर्शवत् पृथिव्यादिस्पर्शो लिंग स्पर्शस्यानुष्णाशीतत्वकथने म

कार्यमात्रे जनककालोपाधि ... व्यापकत्वमिति वस्तुतोऽव्यभिचार ... स्पर्शशब्दकंपधृति २=

अनुमितिरूपकार्यस्य योग्यरूपवत्त्वाभावे नुस्पर्शः सकलविकृतिजः स्पर्शत्वात् पृथिवीस्पर्शवत् पृथिव्यादिस्पर्शो लिंगसाधनकारणाय रूपवद्द्रव्यासम वेतत्वमिति विशेषणम् एवं च शब्दे रूपवद्द्रव्यासमवेतत्वे सति शब्दत्वात् सज्ञा नः स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः अविभज्यमानावयवसमवायित्वात् दृष्टान्तमिति भेदी धूमसंतानवत् पृथिव्याभिघात जन्यनिसिद्ध साधनकारणाया सतीत्वादिवहविशेषणम् विभागजन्यनिशब्दाभिघातकारणा यह तावदिभज्यमाने त्यादि ५=

११

आश्रयत्वं समवायेन तेन कालस्य जगदाधारक-
त्वेपि न क्षतिः

जातिः । किं तु शब्दाश्रयत्वं वैशेषिकरतिकथनं तु विशेषगुणाश्रयत्वव्यवच्छेदाय एतेन प्रमाणमपि दर्शितम् तथाहि शब्दो विशे-
षगुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्वात् स्पर्शवत् शब्दो द्रव्यसमवेतः गुणत्वादित्यनुमानेन शब्दस्य द्रव्यसमवेतत्वसि-
द्धेः शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वात् सुखवत् पाकजरू-
पादौ व्यभिचारवारणाय सत्यन्तं घटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्वक इति जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति न
दिक्कालमनोगुणः विशेषगुणत्वात् रूपवत् नात्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वात् रूपवत् इत्यष्टद्रव्यातिरिक्तं शब्दाधिकरणं नवमं द्रव्यं
गगननामकं सिध्यति न च वायवीयशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम् अयावद्द्रव्य-
भावित्वेन वायुविशेषगुणत्वाभावात् इन्द्रियं दर्शयति इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः ननु आकाशे [illegible]
लाघवादेकं सिद्धं श्रोत्रं तु कर्णभेदाद्भिन्नं कुत्र आकाशे स्यादित्याशङ्क्याह एकः सन्नप्युपाधितः आकाशः एकः सन्नप्युपा-
धितः कर्णशष्कुल्यादेर्भेदाद्भिन्नं श्रोत्रात्मकं सिध्यतीत्यर्थः कालं निरूपयति जन्यानां जनकः कालो जगतामा-
श्रयो मतः परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः तत्र प्रमाणं दर्शयति जगतामाश्रयः इदानीं घट इति
प्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादेः सम्बन्धो वाच्यः स च संयोगा-
दिर्न सम्भवतीति कालएव सम्बन्धघटकः कल्प्यते इत्थं च तस्याश्रयत्वं सम्यक् प्रमाणान्तरं दर्शयति परापर-
त्वधीहेतुः परत्वादिबुद्धेरसाधारणं निमित्तं काल एव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो
लाघवादिति दिक्कृतः कालएव कल्प्यते इति भावः नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादित्य

स० व०
९२

तन्नाह दूरत्वादिः स्यादुपाधितः कालस्त्वेक उपाधिभेदात्क्षणादिव्यवहारविषयः उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म पू
र्वसंयोगावच्छिन्नविभागो वा पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नं कर्म वा न चोत्तरसंयोगानं
तरं क्षणव्यवहारो न स्यादिति वाच्यम् कर्मान्तरसत्त्वादिति महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदा नाशध्वंसैरेवोपपादनी
य इति दिनादिव्यवहारस्तु तत्क्षणकूटैरिति दिशं निरूपयति दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते उपाधिभेदादेकापि प्रा
च्यादिव्यपदेशभाक् दूरत्वमन्तिकत्वं च दैशिकपरत्वमपरत्वं बोध्यम् तद्धेतुरसं [illegible] कारणं दिगेव दैशिकपरत्वापरत्व
योरसमवायिकारणसंयोगाश्रयो लाघवादेका दिक् सिध्यतीति भावः न च यद्येकैव दिक् तदा प्राचीप्रतीच्यादिव्यवहारः का
र्यमुपपद्यतामत आह उपाधीति यस्य कस्यचिदुदयगिरिसन्निहिता या दिक् तस्य कस्य सा प्राची उदयगिरिव्यवहिता प्रती
ची एवं तस्य कस्य सुमेरुसन्निहिता दिगुदीची तद्व्यवहिता त्ववाची सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति नियमात् आत्मा
नं निरूपयति आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् आत्मत्वं जातिः सुखदुःखादिसमवायिकारणतया सिध्यतीति ईश्व
रेऽप्यात्मत्वजातिरस्ति अदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः नित्यसुखस्वरूपयोगफलत्वेन कल्पनाभावनियमस्य स्यात्प्रयो
जकत्वात् परे त्वीश्वरे सा जातिर्नास्ति प्रमाणाभावात् न च दशरथत्वापत्तिः ज्ञानवत्त्वेन विभजनादित्याहुः इन्द्रियाद्यधिष्ठा
तेति इन्द्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः यद्यप्यात्मनि प्रत्यक्षं ज्ञानेऽहं सुखीत्यादिप्रत्यक्षविषयत्व
मस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमतः एव शरीरादिभिन्नत्वेन तस्य प्रतीतिगोचर इति प्रतिपादयितुं तन्ना
शकान्तरमुक्तं ततः प्रमाणं दर्शयति ॥ करणमिति वास्यादीनां छिदादिकरणानां कर्तृ १२

मु

कर्त्तारमंतरेण फलोपधानं इष्टं च चक्षुरादीनां ज्ञानकारणानां कर्त्तारमंतरेण फलोपधानं नापि
नोपपद्यते इत्यतिरिक्तः कर्त्ता कल्प्यते ननु शरीरस्य कर्तृत्वमस्त्वित्यत आह शरीरस्य न चैतन्यं मृतेषु
व्यभिचारात्तः ननु चैतन्यं ज्ञानादिकमेव सकात्मनो न त्वस्मत स्वस्तु शरीराणामपि तु दभावे का
वतिः प्राणाभावेन ज्ञानाभावस्य सिद्धेः इति चेन्न शरीरस्य चैतन्ये बालावलोकितस्य स्थाविरेऽनुपपत्तेः बाल्ये
शरीराणामवयवोपचयापचयैर्हत्वाद् विनाशशालित्वात् न च पूर्वशरीरोत्पन्नसंस्कारेण हि
शरीरोत्पन्नशरीरे संस्कार उत्पद्यत इति वाच्यम् तथा सत्यनंतसंस्कारकल्पनापत्त्या गौरवात् एवं शरी
रस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यात् इष्टसाधनताबुद्धेस्तद्धेतुत्वात् तदानीमिष्टसाधनत्वानुभा
वकाभावात् मन्मते तु जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः न च जन्मान्तरानुभूत
मप्यदृष्टिपि स्मर्यतेति वाच्यम् उद्बोधकाभावात् संस्कारनाशाद्वा अनंतत्वनापत्त्या जीवनादृष्टमेवोद्बो
धकं कल्प्यते इत्थं च संस्कारस्यानादित्वात् आत्मनो नादित्वसिद्धावनादिभावस्य नाशासंभवान्नित्य
त्वं संभवतीति बोध्यम् ननु चक्षुरादीनां ज्ञानादौ करणत्वे कर्तृत्वं चास्तु विरोधे साधकाभावात् इत्यत
आह तथात्वमिंद्रियाणां चेदुपघाते कथं स्मृतिः तथात्वं चैतन्यमित्यर्थः उपघातेनाशे सति अर्थात्
चक्षुरादीनामेव कथमिति एवं च चक्षुषा साक्षात्कृतानां चक्षुषोऽभावे स्मरणं न स्यात् अनुभवितुरभावात्

मनस्तः २५ अस्पष्टस्यास्येन स्मरणाभावात् अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः
नन्वेवं तदा रीतां चैतन्यमात्रविनाशस्य चैतन्यं स्यादित्यत आह मनोपि न तथा ज्ञानाद्य नध्यक्षं तदा भवेत् नत
स्व.व. था न चैतन्ने ज्ञानाद्य नध्यक्षं तदा भवेत् मनसोणुत्वात्मसहत्वे च महत्त्वस्य देहत्वात्मन सिज्ञानसुखादिम
१२ त्वेतन्मत्यत्वानुपपन्नेरित्यर्थः यथा च मनसोणुत्वं तथाग्रेवक्ष्यते नन्वस्तु विज्ञानमेवात्मा तस्य स्वतः प्र
श्री काशरूपत्वाच्चेतनत्वम् ज्ञानसुखादिकन्तस्यैवाकारविशेषः तस्यापि भावत्वादेव क्षणिकत्वम् पूर्वा
घटादेरिति घटादिज्ञानेऽनुभूयमानत्वमिति विज्ञानं तदेवात्मा = पूर्वविज्ञानस्योत्तरोत्तरविज्ञानहेतुत्वात् सुषुप्तावप्यालयविज्ञानधारानिराबाधैव स्मरणमपि वासना
यावमनस्वपूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चे
13 न तस्य जगद्विषयकत्वे सार्वज्ञ्यापत्तिः यत्किंचिद्विषयत्वे विनिगमकाभावः सुषुप्तावपि विषयावभास
प्रसङ्गश्च तदानीं निराकारविज्ञानतिरस्कृतवर्त्मत इति चेन्न तस्य प्रकाशत्वे प्रमाणाभावात् अन्यथा घटा प्रकाशत्वे ज्ञानत्वे ज्ञानत्व स्यविषयताव्याप्यत्वादित्यर्थः =
दीनामपि विज्ञानत्वापत्तिः न चेष्टापत्तिः विज्ञानव्यतिरिक्तस्य वस्तुनोऽभावादिति वाच्यम् घटादेरनु विषयत्वविनैव ज्ञानत्वं नीकारे =
यमानापलापयितुमशक्यत्वात् आकारविशेष एवायं विज्ञानस्येति चेन्न किमयमाकारोऽतिरिच्यते।
विज्ञानान्न वा आद्ये समायातं विज्ञानव्यतिरिक्तेन नातिरिच्यते चेन्न हि समूहालम्बने नीलाकारोपि पीताका १३
रः स्यात् स्वरूपतो विशेषाभावे धारणतो विज्ञानस्याविशेषात् अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चे

भेदक

माताच भूतस्य गर्भस्थेन
तनयेन स्मरणप्रसंगात् २=

वे नीलत्वादीनां विरुद्धानामेकस्मिन्नर्थेऽसमवेशात् इतरथा विरोधावधारणस्यैव दुरुपपादत्वात् नच
वासनासंक्रमः सम्भवति मातृपुत्रयोरपि वासनासंक्रमप्रसङ्गात् नचोपादानोपादेयभावो नियामक इ
तिवाच्यम् वासनायाः संक्रमासंभवात् उत्तरस्मिन्नुत्तरस्मिन्नेव संक्रम इति चेन्न तदुत्पादकासंभवात् चित्तामे
वोत्पादकत्वेन तदसंस्काराननुप्रसङ्गः क्षणिकविज्ञानेषु शक्तिविशेषः कल्प्यत इति चेन्न मानाभावात् का
रणेनागौरवाच्च एतेन क्षणिकशरीरेष्वेव चैतन्यमिति प्रत्युक्तं गौरवात् प्रतिशरीरं मानाभावाच्च बीजादावा
पि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पनात् [illegible] क्षणिकविज्ञाने गौरवा
त् स्थिरं विज्ञानमेवात्मा अविनाशी वाऽरेऽयमात्मा सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतेरिति चेन्न तस्य विषयत्वा
द्युपदर्शितत्वात् निर्विषयकज्ञाने मानाभावात् सविषयकत्वस्याप्यनुभवात् ततो ज्ञानभिन्नो नित्य आ
त्मेति सिद्धम् सर्वं ज्ञानमिति ब्रह्मपरम् जीवेषु तूपचर्यते ज्ञानाज्ञानसुखित्वदुःखित्वादिभिर्जीवाना
भेदः सिद्धः ईश्वरात् जीवभेदः सिद्धः अन्यथा बन्धमोक्षव्यवस्थानुपपत्तेः जीवेश्वरभेदे बोधको वेदः सो
पा८ ऽपि तदभेदेन नदीघटत्वं प्रतिपद्यते इति अभेदभावनयैव परितत्त्वमिति वदति अतएव सर्वेऽप्यात्मानः
समर्पिता इति श्रुतौ मोक्षदशायामज्ञाननिवृत्तावभेदो जायत इत्यपि न भेदस्य नित्यत्वेन नाशा
योगात् भेदनाशेऽपि व्यक्तिद्वयं स्यादेव न चाद्वैतमपि नश्यतीति वाच्यम् तत्र निर्धर्मके ब्रह्मणि स

४ शक्तितत्कार्यभावध्वंसकल्पने गौरवात्

उपादानेना[illegible]ंशपादे
येन समर्थेन तदभावनिरासात् २=

कुर्वद्रूपत्वं चाङ्कुरजनकतावच्छेदकतया सिद्धो जाति
विशेषः =
क

मत्वाभावेपि समस्तव्यूहं तदिति वहित्वाभावेपि हृद्यात्मकौता इति स्ववचनात् मिथ्यात्वाभावोधिकरणात्म
कस्तत्र सत्यत्वमिति चेत् एकत्वाभावोप्यक्लिष्टद्यात्मको हित्वमिथ्यात्वात् प्रत्येकमेकत्वेपि पृथिवीज
लयोर्न नंधरति वहु भयंनैकमित्यस्य सर्वजनसिद्धत्वात् योपि तदानीमभेदप्रतिपादक आगमः सोपि
मु॰व॰ २४ निर्द्वैतत्वादिना साम्यं प्रतिपादयति सपदाधिकेपुरोहितो वैराजा संवृत इति वत् अत एव निरंजनः मलधीयान्वयेनानंदवदर्थः प्रत्ययान्तकत्वानापत्तिः ५८
परमं साम्यमुपैतीति श्रूयते ईश्वरोपि नज्ञानसुखात्मा किन्तु ज्ञानाद्याश्रयः नित्यविज्ञानमानंदं ब्रह्मेत्या
आधिकरत्वेस्त्वं... दौ विज्ञानपदेन ज्ञानाश्रयएवोक्तः यः सर्वज्ञः सर्ववित् इति श्रुतिविरोधात् आनंदमित्यस्याप्यानंदवदित्यर्थः
आनन्दोपि दुःखाभावे उपचर्यते भावाद्युपगमे सुखी संवृत्तोहमिति वत् अस्तु वा तस्मिञ्ज्ञाने दोना
त्वमा वानन्दः अस्तु वा इति श्रुतेः न विद्यते सुखं यस्येति कृतो नाप्येति चेन्न कल्पनापत्तेः प्रकर
दाम णविरोधात् इमिस्यममत्वर्थीयात् प्रत्ययविरोधाच्चेति एतेन प्रकृतिकर्त्री पुरुषः पुष्करपलाशवत् निर्लेपः
किंतु चेतनः कार्यकारणयोरभेदात्कार्यनाशे सति कार्यरूपतया नाशोनस्यादित्यकारणत्वेन तस्य उ
द्गितत्वे तस्याभिमानाभावापपत्तेत्तत्कल्पनम् बुद्धिस्तु प्रकृतेः परिणामः सैव महत्तत्वमन्तःक
रणमुच्यते तत्सत्वासत्वाभ्यां पुरुषस्य संसारापवर्गौ तस्यामभिमानस्य भेदाग्रहात् ममेदं कर्तव्यमिति
मेदेशः पुरुषोपरागो बुद्धेः स्वच्छतया तस्मिन्नपि विंवात् तात्विकः दर्पणस्येव मुखोपरागः इदमिति २४
एवमिंद्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिनासम्बन्धः पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याद२॥

स्तु चेतनोऽहं करोमीति प्रतीतेः परिणामित्वाच्चैतन्यांशे भ्रम इति चेन्न कर्तृत्वांशे किं नेष्यते अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावः ५९

विषयोपरागः इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विकः निर्मलाभिहतदर्पणस्येव मलिनिमा कर्तृत्वमपि
तिच्छायापातांशः तेन यद्यपि शब्दवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्य तात्त्विकः सम्बन्धः तात्त्विकः विषयाणां
पि रूपदर्पणमलिनिमेव सुखदुःखोपलब्धिरुच्यते ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्माणामपि बुद्धेरेव
कृतिसमानाधिकरणत्वेन प्रतीतेः ननु बुद्धिश्चेतनापरिणामित्वात् इति मतमपास्तम् कृत्यदृष्टभोगानां
मिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेः तद्धि त्रैमानाभावात् अनित्यत्वे तत्त्वे संसारापत्तिः अचेत
नायाः प्रकृतेः कार्यत्वात् बुद्धेरचैतन्यम् कार्यकारणयोस्तादात्म्यादिति चेन्न असिद्धेः कर्तृजन्यत्वेमा
नाभावात् वीतरागजन्मादर्शनादिना दृष्टादित्वम् अनादेर्नाशासंभवान्नित्यत्वे तत्किं प्रकृत्यादिकल्पने
न नव प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यते इत्यनेन
विरोध इति वाच्यं प्रकृतेर्गृहस्य गुणैरदृष्टजन्मैरिच्छादिभिः कर्ताहमेवेत्यस्य तदर्थत्वात् तथैवं सति
कर्तारमात्मानं केवलं तु यः पश्यतीति वदता भगवता प्रकटीकृतोऽयमपरिशिष्टाशय इति संक्षेपः धर्माध
र्माश्रयो ध्यातो विशेषगुणयोगतः आत्मेत्युच्यते शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणो दे
हान्तरेण भोगानुपपत्तेः विशेषगुणयोगतः इति योग्यविशेषगुणसम्बन्धेन आत्मनः प्रत्यक्षत्वम् अव
तिनत्वन्याया अहं जानेऽहं करोमीत्यादिप्रतीतेः परात्मा तु मीयते इत्याह प्रत्यगात्मा ह्यमेयो ये रण

अधिष्ठानं तथा कर्ता करणं च पृथग्विधं विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् इत्यनेन पञ्चानामपि कर्तृत्वं प्रतिपादितं तथैवं सति स्वतन्त्रकर्तृत्वस्यैवात्मनो निषिद्धत्वादिति भावः ५८

शरीरस्य न चैतन्यमित्यत्रेनोक्तत्वात् = इच्छादीनामभावस्य कथ[illegible] स्वेशानुक्तेः प्रायपदम् २=

त॰व॰
१५

15

गत्येव सारथिः अयमात्मा परदेहादौ प्रवृत्त्यादिनानुमीयते प्रवृत्तिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहे
अभावस्योक्तप्रायत्वात् चेष्टायाश्च प्रयत्नसाध्यत्वात् चेष्टया प्रयत्नवाननुमीयत इति भावः अत्र दृष्टा
न्तमाह रथेति यद्यपि रथकर्म चेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथानुमीयते तथा चेष्टात्मकेन
कर्मणा पर[illegible]त्मापीति भावः अहंकारस्याश्रयोयं मनोमात्रस्य गोचरः अहंकारो ऽहमिति प्रत्ययस्तस्या
श्रयो विषय आत्मा न शरीरादिरिति मन इति मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषय इ
त्यर्थः रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् विभुर्बुद्ध्यादिगुणवान् विभुत्वं परममहत्परिमाणवत्त्वं
कालत्वोक्ते सार्वदा
तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तं बुद्ध्यादीति बुद्धिः सुखदुःखेच्छाद्वेषप्रयत्नदशगुणाः पूर्वमुक्ता वेदितव्याः अ
थैवमप्रसक्तात् बुद्धेः प्रपंचं दर्शयति बुद्धिलक्षणद्विविधा मता द्वैविध्यं कथयति अनुभूतिः स्मृतिश्च स्याद
नुभूतिश्चतुर्विधा ~~[illegible]~~ यद्यपि ~~[illegible]~~ अनुभव
त्वं च स्मृत्यन्यज्ञानत्वम् जातिविशेषो वा अनुभवामीत्यनुव्यवसायसिद्ध इति अनुभवत्वं जातिरित्य
पि केचित्तत्र चतुर्विधेति प्रत्यक्षमप्यनुमितिस्तथोपमितिशाब्दे एतासां चतसृणां करणानि चत्वारि प्र १५
माणानि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि तत्रेन्द्रियजन्यज्ञानं प्रत्य
क्षम् यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं तथापीन्द्रियत्वेन रूपेणेन्द्रियाणां यज्ज्ञाने करणत्वं तत्प्र

ज्ञमिति विवक्षितम् ईश्वरस्य प्रत्यक्षं न लक्ष्यम् इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि
व्यवसायात्मकं प्रत्यक्षमिति सूत्रे तथैवोक्तत्वात् अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षमनुमितौ व्याप्तिज्ञानस्यो
पमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणेऽनुभवस्य करणत्वान्नातिव्याप्तिः इदं लक्षणमी
श्वरप्रत्यक्षसाधारणम् परामर्शजन्यं ज्ञानमनुमितिः यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि
परामर्शजन्यं हेतुविषयकं ज्ञानमनुमितिः न च कादाचित्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यम्
तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः
एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः पदज्ञानकरणकं ज्ञानं शाब्दबोधः वस्तुतो यत्किंचिदनुमि
तिव्यक्तिमादाय तद्व्यक्तिवृत्तिर्जातिमत्त्वमनुमितित्वम् एवं यत्किंचित्प्रत्यक्षादिव्यक्तिमादाय तद्व्यक्ति
त्येमतिप्र यत्तावृत्ति वृत्त्यनुमित्यवृत्तिजातित्वं प्रत्यक्षत्वादिकं वाच्यमिति जन्यप्रत्यक्षाणि विभजते घ्राणजादिप्रभेदेन
घ्राणजरासनचाक्षुषस्पार्शनश्रौत्रमानसमिति प्रत्यक्षं षड्विधं मतम् ॥५॥ न चेश्वरप्रत्यक्षस्याविभज ख
नान्न्यूनत्वम् जन्यप्रत्यक्षस्यैव निरूपणीयत्वात् उक्तसूत्रानुसारात् घ्राणस्य गोचरो गन्धो गन्धा
त्वादिरपि स्मृतः गोचर इति ग्राह्य इत्यर्थः गन्धत्वादिरित्यादिपदात्सुरभित्वादिपरिग्रहः गंधस्य प्रा

मु० वृ०
१६
16

यत्वात्तद्वृत्तिजातिरपि घ्राणग्राह्या गन्धाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यम् तथा रसो रसज्ञायाः रस-
त्वादिसहितो रसः तथा शब्दोऽपि च श्रुतेः ॥ ५२ ॥ तथा शब्दत्वादिसहितः गंधरसस्पर्शोद्भूतो बोध्यः उद्भूतरूपं न-
यनस्य गोचरो द्रव्याणि तद्वंति पृथक्त्वसंख्ये विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ॥ ५३ ॥ क्रि-
याजातियोग्यवृत्तिः समवायश्च तादृशः ग्रीष्मोष्मादावुद्भूतरूपमिति न प्रत्यक्षं तद्वंति उद्भूतरूपवन्ति
योग्यानि पृथक्त्वादिकमपि योग्यव्यक्तिवृत्ति विवक्षितः तादृशी योग्यव्यक्तिवृत्तिः वस्तुयोग्यत्वमेव कारणं तदाह
गृह्णाति चक्षुः संयोगादालोकोद्भूतरूपयोः आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणम् तत्र द्र-
व्यचाक्षुषप्रत्यक्षं प्रति तयोः समवायसम्बन्धेन कारणत्वम् द्रव्यसमवेतप्रत्यक्षे स्वाश्रयसमवायसंबन्धेन
द्रव्यसमवेतसमवेतरूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेनेति उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः
सोऽपि उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः रूपान्यच्चक्षुषो योग्यं रूपत्वादिसहितरूपभिन्नं यच्चक्षुषो योग्यं।
यं तत्त्वगिन्द्रियस्यापि ग्राह्यम् तथा च पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ताः [illegible] क्रियाप्येवं जाति-
यो योग्यवृत्तयः त्वचो ग्राह्याः रूपमत्रापि कारणम् द्रव्याध्यक्षेऽत्रापि त्वगिन्द्रियजन्येऽपि द्रव्यप्रत्यक्षे रूपं कारण- १६
म् तथा च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति नवीनास्तु बहिर्द्रव्यप्रत्यक्षे न रूपं कारणं प्रमाणा-

समवैति

भावात् किंच चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे च स्पर्शः कारणमन्वयव्यतिरेकात् बहिरिंद्रियजन्यद्रव्यप्रत्य
क्षमात्रे किं कारणमिति चेदुक्तं किंचित् आत्मावृत्तिशब्देतरविशेषगुणवत्त्वं वा शब्दयोग्यत्वमस्तु रूपस्य कार
णत्वे लाघवमिति चेन्न वायोस्त्वगिंद्रियेण ग्रहणाप्रसंगात् स्पर्शाद्यतिरिति चेन्न स्पर्शस्यैव लाघवात् कारणमस्तु उद्भूत
प्रभायाश्च प्रत्यक्षे तद्विरहान्निरवकाशे न स्यात् तस्मात् प्रभां पश्यामीति वत् वायुं स्पृशामीति प्रत्यक्षस्य सत्वात् वा
योरपि प्रत्यक्षत्वं भवत्येव बहिर्द्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रभयोरेकत्वं गृह्यत एव क्वा
चिद्द्वित्वादिकमपि क्वचित् संख्यापरिमाणग्रहो दोषादिसाङ्कर्यः त्वङ्मनोयोगो मनसा ज्ञानकारणम् आत्ममनःसंयोगो
ज्ञानसामान्ये कारणमित्यर्थः किं तत्र प्रमाणं सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्त्तमानेन मनसा ज्ञानाजन
नमिति ननु सुषुप्तिकाले किं ज्ञानं भविष्यति यत्र च भवद्रूपं स्मरणरूपं वा नाद्यः अनुभवसामग्र्यभावान्नद्यादि
५१. देव बुद्ध्यादीनां सहमनःसंयोगस्य हेतुत्वात् तदभावे न चाक्षुषादिप्रत्यक्षम् ज्ञानादेरभावादेव न मानसप्रत्यक्ष
म् ज्ञानाद्यभावे चात्मनोपि न प्रत्यक्षमिति व्याप्तिज्ञानाभावादेव नानुमितिः सादृश्यज्ञानाभावान्नोपमितिः
पदज्ञानाभावान्न शाब्दबोधः स्मृत्यनुभवसामग्र्यभावान्नानुभवः उद्बोधकाभावान्न स्मरणम् एवं सुषुप्तिप्राक्का
लोत्पन्नेच्छादिव्यक्तेस्त्वक्संबंधेनात्मनश्च प्रत्यक्षप्रसंगात् तदंतरिंद्रियत्वे मानाभावात् सुषुप्तिप्राक्काले निर्विक।

इच्छाद्या ज्ञानादिरिति सुषुप्त्या ज्ञानमात्रं विवक्षितम् १५

मुक्ताव॰ २

देवत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात्कल्प्यत इति ग्रन्थे [illegible] प्रत्यनुरोधा त्कर्ममनःसं

त्वकमेव नियमेन ज्ञायत इत्यत्रापि प्रमाणाभावात् ग्रहणाग्रहणमात्रे [illegible] मनःसंयोगस्य हि कारणत्वे तदा [illegible] योगस्य २

त्वाचप्रत्यक्षे स्यात् २ दुष्पारि [illegible] प्रत्यक्षकाले विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् परस्परप्रतिबन्धात् एकमपि ज्ञा

न स्यादिति अत्र केचित् एवं क्रमप्रत्यक्षे त्वङ्मनःसंयोगस्यैव हेतुत्वं कल्प्यते चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसं

योगस्याभावान्न त्वाचप्रत्यक्षमिति मनोग्राह्यं सुखदुःखमिच्छा [illegible] मतिः कृतिः ८६ मनोजन्यप्रत्यक्ष मान॰ हेतुः

मु॰ व॰ २ विषयस्सुखादिः मतिर्ज्ञानं कृतिः प्रयत्नः एवं सुखत्वादिकमपि मनोग्राह्यमेवमात्मापि मनोग्राह्यः किं तु मनोमात्रस्य गो

चर इत्यनेन एवं मुक्तत्वात्तन्नोक्तम् ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घ घट

17 टत्वादिविशिष्टज्ञानं न सम्भवति एवं विशेषणस्य घटत्वादेर्ज्ञानाभावात् विशिष्टबुद्धौ विशेषण[illegible]स्य कारण ज्ञान॰

त्वात् तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाहि ज्ञानं जायते तदेव निर्विकल्प[illegible]कम् तच्च न प्रत्यक्षम्

तथाहि वैशिष्ट्यानवगाहिज्ञानस्य न प्रत्यक्षं संभवति घटमहं जानामीति प्रत्ययात्तत्र ज्ञानं प्रकारीभूय

भासते तत्र घटत्वं प्रकारो घः स एव विशेषणमित्युच्यते विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदक राम

मित्युच्यते विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणं निर्विकल्पके च घटत्वादिकं न प्रकार १२

स्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यज्ञानेन [illegible] संभवति ज्ञानातिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वा

भा निर्विकल्पके ८

घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न सम्भवति

नियमात् महत्त्वं षड्विधे हेतुः द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणं द्रव्यसमवेतानां गुणकर्मसामान्यानां
प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन द्रव्यसमवेतसमवेतानां गुणकर्मवृत्तीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसं
बन्धेन कारणमिति इन्द्रियं करणमतम् ५७ अत्रापि षड्विधप्रत्यक्षत्वमे इन्द्रियत्वं न जातिः पृथिवीत्वादि
नासंकरप्रसङ्गात् इन्द्रियत्वं च शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्व
म् आत्मादिवारणाय सत्यन्तम् उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वाच्छब्देतरेति विशेषगुणस्य रूपादेश्चक्षुरादिषु स
त्त्वाद् उद्भूतेति उद्भूतत्वं न जातिः शुक्लत्वादिना संकरात् न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम् उ
द्भूतरूपत्वादिना चाक्षुषादौ जनकतावच्छेदकत्वानुपपत्तेः किंतु शुक्लत्वादिव्याप्यमनुद्भूतत्वं नाना तदभावकूटमुद्भूतत्वं न च
संयोगादावव्याप्तिरतश्च शब्देतरोद्भूतगुणः संयोगो विशेषेति कालादिवारणाय विशेषपदम्
कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतमनःसंयोगाश्रयत्वाद्विवारणाय मनःपदम् ज्ञा श्रयस्य काला
न कारणत्वात्तद्विवारणाय करणमिति असाधारणकारणं करणम् असाधारणत्वं व्यापारवत्त्वम् विषयें
न्द्रियसंबन्धो व्यापारः सोऽपि षड्विधः ५७ व्यापारः सन्निकर्षः षड्विधः सन्निकर्षमवान्तरभेदद्वारा दर्शयति द्र
व्यग्रहस्तु संयोगात् संयुक्तसमवायतः द्रव्येषु समवेतानां तथा तत्समवायतः तत्रापि समवेतानां शब्दस्य
समवायतः तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ५८ द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यं द्रव्यसमवेतप्रत्यक्षमिन्द्रिय

जन्यान्वयदितव्यापारत्वस्य श्रोत्रे शब्दसंबंधे समवाये भावादा ...
व्यापारः सन्निकर्षरूपः = २

न तु द्रव्यप्रत्यक्षे इन्द्रियसन्निकर्षत्वेन हेतुत्वे महत्त्वानवच्छिन्नसंयोगात् परमाणोः प्रत्यक्षापत्तिः स्यादिति = १ नन्वेवमात्मप्रत्यक्षानुरोधेन मनःसंयोग
स्यापि प्रत्यासत्तित्वे विभिन्नमनःसंयु

संयुक्तसमवायजन्ये एवमग्रेऽपि वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम् द्रव्यसमवेतचाक्षुषं प्रति चक्षुः
संयुक्तसमवायः द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः एवमन्यत्रापि विशिष्यैव का
मु.व. र्यकारणभावः परं तु पृथिवीपरमाणुनीले नीलत्वं पृथिवीपरमाणौ पृथिवीत्वं च चाक्षुषं कथं न गृह्यते तत्र परं प
१९ रयोर्द्रव्ययोः संबन्धस्य महत्त्वसंबन्धस्य च विद्यमानत्वात् तथा हि नीलत्वं जातिरेकैव घटनीले परमाणुनीले च
वर्तते तथा च महत्त्वसम्बन्धो घटनीलमादाय वर्तते रूपसंबन्धस्तु परमाणुमादायैव वर्तते एवं पृथिवीत्वेऽपि घटा
दिकमादाय महत्त्वसंबन्धो बोध्यः एवं चायोग्यत्वेऽपि परमाणौ चक्षुर्ग्राह्यत्वप्रसङ्गः स्यात् तस्मादुद्भूतरूपाव
च्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतप्रत्यक्षे तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्य
समवेतसमवेतप्रत्यक्षे कारणत्वं वाच्यम् इत्थं च परमाणुनीलादौ न नीलत्वादिप्रत्यक्षं परमाणौ चक्षुःसं
योगस्य महत्त्वावच्छिन्नत्वाभावात् एवं चायोग्यत्वे न संख्यादिचाक्षुषं तत्र चक्षुःसंयोगस्य रूपावच्छिन्नस्याभावात्
एवं घटस्य पृष्ठावच्छेदेनालोकसंयोगे चक्षुःसंयोगस्याग्रावच्छेदेन न च घटप्रत्यक्षत्वाभावात् आलोकसंयो
गावच्छिन्नत्वं चक्षुःसंयोगे विशेषणं बोध्यम् एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणम् द्रव्यसमवेतस्पार्श
नप्रत्यक्षे त्वक्संयुक्तसमवायः द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः अत्रापि मह १९
त्त्वावच्छिन्नत्वम् उद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यम् एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः गन्धसम

वेतस्य घ्राणप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः रसप्रत्यक्षे रसनसंयुक्तसमवायः रससमवेतस्य रसनप्रत्यक्षे रस
नसंयुक्तसमवेतसमवायः कारणम् शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः शब्दसमवेतशब्दत्वप्रत्यक्षे श्रोत्रावच्छिन्नस
मवेतसमवायः अत्र सर्वत्र प्रत्यक्षे लौकिकं ग्राह्यमेव स्मारणम् अलौकिकप्रत्यक्षं त्विंद्रियसंयोगादि विनापि जायते
एवमात्मप्रत्यक्षे मनःसंयोगः आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः कारणम् आत्मसमवेतसमवेतमान
सप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः विशेषणता त्वयोग्यानुपलब्धभावानां ग्रहे भवेत् अभावप्रत्यक्षे समवायप्रत्यक्षे चें
३ द्रियसंबद्धविशेषणता हेतुः वैशेषिकमते तु समवायो न प्रत्यक्षः अत्र यद्यपींद्रियसंबद्धविशेषणता नानाविधा
तथाहि भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया
संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया शब्दाद्यभावः केवलया श्रोत्रावच्छिन्नविशेषण
तया कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया एवं कत्वादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेत
समवेतविशेषणतया एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया घटाभावादौ पटाद्य
भावः संयुक्तविशेषणविशेषणतया एवमन्यदप्यूह्यम् तथापि विशेषणतात्वेनैकैव गण्यते अथ यथा घटो वास्यात्सति
रितिशाघो वा धेवाद्दृश्येतेति तर्हि स्वाऽनुपलभ्येते तेनैवं यत्र प्रसज्यते तत्र तत्समवायस्य विशेषणतया भवेत् अभाव
प्रत्यक्षे योग्यानुपलब्धिः कारणम् तथाहि भूतलादौ घटादिज्ञाने घटाभावादिकं न ज्ञायते तेनाभावोपलम्भे प्रति
योग्यानुपलब्धिः कारणम् न च योग्यतायामपेक्षिता सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा

तर्ह्यस्य प्रतियोगिनो घटादेः सूक्ष्मप्रत्यक्षाप्रसंजितउपलंभस्य प्रतियोगी यस्य सत्युपलम्भाभावोऽभावप्रत्यक्षे हेतुः न
स्यादि यत्रालोकसंयोगादिकं वर्तते तत्र घटस्पर्शेऽपि तस्मिंस्तेनापादयितुं शक्यते तेन तत्र घटाभावादिप्रत्यक्षं भ
वति अन्धकारे तेनापादयितुं शक्यते तेन घटाभावादेरन्धकारे चाक्षुषादिप्रत्यक्षेण स्पार्शनप्रत्यक्षेण भवत्येव आ
मु॰ व॰ १५ लोकसम्बन्धं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात् गुरुत्वादिकं तत्र संयोगेऽपि तदभावस्तु न प्रत्यक्षः न ह्यगु वक्षावतुःस्पर्श भाव
रुत्वादिकप्रत्यक्षस्यापादयितुमशक्यत्वात् वायौ रूपाभावः पाषाणे सौरभाभावः गुडे तिक्ताभावः श्रो
त्रे शब्दाभावः आत्मनि सुखाभावः एवमादयस्तु न हीन्द्रियैर्गृह्यन्ते तत्र तत्प्रत्यक्षस्यापादयितुं शक्यत्वात् संसर्गा
19 भावप्रत्यक्षे प्रतियोगिनो योग्यता अन्योन्याभावप्रत्यक्षे ऽधिकरणयोग्यतापेक्षिता अतस्तम्भादौ पिशाचादिभेदो
पि चक्षुषा गृह्यत एव प्रत्यक्षं तु लौकिकादिभेदेन द्विविधम् तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षा उक्ताः अलौकि
कसन्निकर्षस्त्विदानीमिदमुच्यते अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः व्यापारः सन्निकर्षः सामान्यलक्षणो
ज्ञानलक्षणो योगजस्तथा सामान्यलक्षणेत्यस्यार्थः तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपा प्रत्या
सत्तिरित्यर्थो लभ्यते तदिन्द्रियसंबद्धविशेष्यकज्ञाने प्रकारीभूतं बोध्यम् तथाहि इन्द्रियसंयुक्तो धूमादिस्तद्विशे ५४
ष्यकं धूम इति ज्ञानं यत्र जातं तत्र ज्ञाने धूमत्वं प्रकारः तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलधूमविष
यकं ज्ञानं जायते अत्र यदीन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतमित्युच्यते तदा धूलीपटले धूमभ्रमानन्तरं सकलधूम १५
विषयकं ज्ञानं न स्यात् तत्र धूमत्वेन सहेन्द्रियसम्बन्धाभावात् सम्बन्धेतरेन्द्रियसम्बद्धधूलीपटलेन विशेष्य
न
वै॰ २

ज्ञायमानं सामान्यं न तु सामान्यं प्रत्यासत्तिः परं तु

के धूम इति ज्ञाने तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः इंद्रियसम्बन्धस्तु लौकिको ग्राह्यः इदं च बहिरिंद्रियस्थले मा
नसस्थले तु ज्ञानप्रकारीभूतसामान्यं सन्निकर्षः समानानां भावः सामान्यम् तच्च क्वचिन्नित्यं धूमत्वादि क्वचिदा
नित्यं घटादि यत्रैको घटः संयोगसम्बन्धेन भूतले समवायेन कपाले वा ज्ञातस्तदनन्तरं च सर्वेषां तद्घटवतां भूतलादीनां
कपालादीनां वा ज्ञानं भवति। तदेवं बोध्यम् परं तु सामान्यं येन सम्बन्धेन ज्ञायते तेन सम्बन्धेनाधिकरणानां प्रत्यास
त्तिः किं च तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सर्वेषां तद्घटवतां भानं न स्यात् सामान्यस्य तदानीमभावात्
किं चेंद्रियसम्बन्धस्य विशेष्यके घट इति ज्ञानं यत्र जातं तत्र परदिने इंद्रियसम्बन्धं विनापि तादृशज्ञानप्रकारीभूतसा
मान्यस्य सत्त्वात् सकलघटविषयकं ज्ञानं कुतो न जायते तस्मात् सामान्यज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह आसत्तिरा
श्रयाणां तु सामान्यज्ञानमिष्यते ६३ प्रत्यासत्तिरित्यर्थः तथा च सामान्यलक्षणेत्यत्र लक्षणशब्दस्य विषय इत्यर्थः
तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरिति लभ्यते ननु चक्षुःसंयोगं विनापि सामान्यज्ञानं यत्र वर्तते तत्र घटादी
नां प्रत्यक्षं स्यादत आह तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते अस्यार्थः यदा बहिरिन्द्रियेण सामान्यलक्षणया
ज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानसामग्र्यपेक्षा सा च सामग्री चक्षुःसंयोगालोकसंयो
गादिकं तेनान्धकारादौ चक्षुरादिना तादृशं ज्ञानं न जन्यते नन्वेतज्ज्ञानलक्षणप्रत्यासत्तिर्ज्ञानरूपा सामान्यलक्षणापि ज्ञा
नरूपा तदुभयतो भेदो न स्यादत आह विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ६४ सामान्यज्ञानलक्षणप्रत्यासत्तिर्हि
तदाश्रयज्ञानं जनयति ज्ञानलक्षणप्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति अस्यायमर्थः प्रत्यक्षे स

श्री

न्निकर्षं विनाभानेन संभवति तथा च धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां भानं कथं भवेत् तदर्थं सामान्यलक्षणा
स्वीक्रियते न च सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यम् धूमप्रत्यक्षे धूमे वह्निसम्बन्धस्य गृहीतत्वादन्यधूमस्यानुप
स्थितत्वाद्धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्त
स्वः २ रीयधूमे वह्निव्याप्यत्वसंदेहः संभवति न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरिति
वाच्यम् प्रमेयत्वेन सकलप्रमेयज्ञानेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात् एवं ज्ञानलक्षणाया
अस्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात् यद्यपि सामान्यलक्षणयापि सौरभस्य भानं सम्भवति
तथापि सौरभत्वस्य भानं ज्ञानलक्षणया एवं धूमत्वेन धूलीपटले यज्ज्ञातं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञान
लक्षणया योगिजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ॥४४॥ योगिनो द्वि
विधाः युक्ता युञ्जानाश्च युक्तो योगजधर्मस्यापि द्विविधम् युक्तस्य तावद्योगजधर्मसहायेन मनसाकाशपरमा
ण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदा भवितुमर्हति द्वितीयस्य चिन्ताविशेषोऽपि सहकारीति इति प्रत्यक्षम्
अनुमितिं व्युत्पादयति व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् अनुमायां अनुमायामनुमितौ व्याप्तिज्ञानं
करणं परामर्शो व्यापारः तथा हि येन पुरुषेण महानसादौ धूमे वह्निव्याप्तिर्गृहीता पश्चात् स एव पुरुषः क्वचित्प
मूलं ४५ र्वतादौ अविच्छिन्नमूलां धूमरेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवंरूपं व्याप्तिस्मरणं तस्य भवति पश्चाद्वह्नि २
व्याप्यधूमवानयं पर्वत इति ज्ञानं भवति स एव परामर्श इत्युच्यते तदनन्तरं पर्वतो वह्निमानिति ज्ञानं जायते तदेवानु

मि

मितिः अत्रप्राचीनावदंति व्याप्यत्वेनज्ञायमानंधूमादिकंलिङ्गमनुमितिकरणंतद्दूषयंति ज्ञायमानेलिङ्गंकरणंनहि
लिङ्गस्यानुमितिकरणत्वेयुक्तिमाह अनागतादिलिंगेननस्यादनुमितिरित्यत्र यद्यनुमितौलिङ्गंकरणंस्यात्तदाना
गतेनविनष्टेनवालिङ्गेनानुमितिर्नस्यादनुमितिकरणस्यतदानीमभावादिति व्याप्यस्यपक्षवृत्तित्वधीःपराम लिङ्गस्य x
र्शउच्यते व्याप्तिविशिष्टस्यपक्षेणसहवैशिष्ट्यावगाहिज्ञानमनुमितौजनकंतच्चव्याप्यःपक्षइतिज्ञानंपक्षोव्या
प्यवानितिज्ञानंवानुमितिस्तुपक्षेव्याप्यइतिज्ञानात्पक्षेसाध्यमित्याकारिका।पक्षोव्याप्यवानितिज्ञानात्पक्षःसाध्यवानि
ति द्विविधादपिपरामर्शात्पक्षःसाध्यवानित्येवानुमितिरित्यन्ये ननुवह्निव्याप्यधूमवान्पर्वतइतिज्ञानंविनापियत्रधूम
वानितिप्रत्यक्षेततोधूमोवह्निव्याप्यइतिस्मरणेतत्रज्ञानद्वयादेवानुमितिदर्शनाद्व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानंस वा x
र्वत्रनकारणम् किंचव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनकारणत्वमावश्यकत्वात् तद्विशिष्टज्ञानकल्प
नागौरवाच्चेतिचेन्न व्याप्यतावच्छेदकाज्ञानेपिवह्निव्याप्यवानितिज्ञानादनुमित्युत्पत्तेः लाघवाद्व्याप्तिप्रकारकप
क्षधर्मताज्ञानत्वेनहेतुत्वम् किंचधूमवान्पर्वतइतिज्ञानादनुमित्यापत्तिः व्याप्यतावच्छेदकीभूतधूमत्वप्रकार
कस्यपक्षधर्मताज्ञानस्यसत्वात् नचधूममात्रंव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यहेतुत्वंवाच्यम् चैत्रा धर्म x तिति x
स्याव्याप्तिज्ञानेमैत्रस्यपक्षधर्मताज्ञानादनुमितिःस्यात् यदितुतत्तत्पुरुषीयत्वमात्मव्याप्यतावच्छेदकंप्रकारकंतत्पु
रुषीयपक्षधर्मताज्ञानंतत्पुरुषीयानुमितौहेतुरित्युच्यतेतदानन्तकार्यकारणभावः मन्मतेतुसम्बन्धेनव्याप्तिप्र समवाय x३
कारकपक्षधर्मताज्ञानंसमवायसम्बन्धेनानुमितिंजनयतीत्यर्थेनानन्तकार्यकारणभावः यदितुव्याप्तिप्रकार
कंज्ञानंपक्षधर्मताज्ञानंचस्वतंत्रकारणमित्युच्यतेतदाकारणभावद्वयेवह्निव्याप्योधूमआलोकवान्पर्वतइतिज्ञा।

कार्य

कार्यकारणभावज्ञानाधीनगौरवस्य

नास्त्वमितिः स्यादिति इत्थं च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्प्यते फलमुखगौरवस्यादोषत्वादिति व्याप्यो नाम व्या
प्याश्रयस्तत्र व्याप्तिः केत्यत आह व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृता साध्येति वह्निमान् धूमादित्यादौ साध्यो व
मु॰ व २१ ह्निः साध्यवान् महानसादिः तदन्यो जलह्रदादिः तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः धूमवान् वह्नेरित्यादौ साध्यवद
न्यस्मिन्नयःपिण्डादौ वह्नेः सत्त्वान्नातिव्याप्तिः येन सम्बन्धेन साध्यं तेनैव सम्बन्धेन साध्यवान् बोध्यः अन्यथा समवाय
सम्बन्धेन वह्निमान् वह्न्यवयवस्तदन्यो महानसादिस्तत्र धूमस्य विद्यमानत्वादव्याप्तिप्रसङ्गात् साध्यवदन्यश्च साध्यत्वावच्छि व
न्नप्रतियोगिताकभेदवान् बोध्यः तेन यत्किंचिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमस्य सत्त्वेऽपि न क्षतिः येन सम्बन्धेन हेतु
ता तेनैव साध्यवदन्यावृत्तित्वं बोध्यम् तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसम्बन्धेन सत्त्वेऽपि न क्षतिः साध्यव इत्यादि ८९
दन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वावच्छिन्नाभावः तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यावृत्तित्वाभावेऽपि नातिव्याप्तिः अत्र
११८ यद्यपि इदं कर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः सत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादौ वृत्तित्वेनाव्याप्तिस्त
थापि हेतुतावच्छेदकरूपेणावृत्तित्वं बोध्यम् प्रकृते च विशिष्टसत्तात्वस्य हेतुतावच्छेदकत्वान्नाव्याप्तिः हेतुतावच्छेदकं
रूपं न त्ववच्छेदकमिति फलितोऽर्थः ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः किं च सत्तावा
न् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसम्बन्धेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिरत आह अ
थवा हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते हेतुमति निष्ठा वृत्तिर्यस्य सः तथा
विरहोऽभावः तथा च हेत्वधिकरणवृत्तिर्योऽभावस्तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिः अत्र य राम
द्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्न्यादेरस्तीत्यव्याप्तिः न च सामानाधि २१

हेतुतावच्छेदकं

दि

करणावच्छिन्नधूमयोरेव व्याप्तिरिति वाच्यम् तद्धेतुरूपम यावाभावसत्वादेकसत्वेपि घटं नास्तीति प्रतीतेर्गुणत्वानवच्छिन्नत्वादिना
दावव्याप्तिश्च तथापि साध्यतावच्छेदकं प्रतियोगितानवच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति वाच्यम् तथा
च रेत्वमग्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकमिति सिद्धम् नन्वत्रापि रूपत्वव्याप्यजातिमा
न्पृथिवीत्वादित्यत्र साध्यतावच्छेदकीभूतरूपत्वव्याप्यजातेर्यस्मात्सा [illegible] त्वादिरूपजातीनां नीलत्वादीनामभावप्र
तियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न तत्परंपरया रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात् नहि साक्षात्समवायेन
तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्यामस्ति रूपत्वव्याप्यजातिमान्नास्तीति प्रतीत्यापत्तेः तथा च रूपत्वव्याप्यजातेर
भावप्रतियोगितावच्छेदकत्वाभावान्नाव्याप्तिः एवं च गिरिमान् वह्निसंयोगादित्यादावपि परंपरया वह्नित्वमेव
साध्यतावच्छेदकमिति नाव्याप्तिः साध्यादिभेदेन व्याप्तिभेदेऽप्याह क्वचिदिति साध्यतावच्छेदकतावच्छेदकं प्रतियोगिता
वच्छेदकतानवच्छेदकमित्येवं लक्षणघटकमित्यपि वदन्ति हेत्वधिकरणं हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यम् तेन द्र
व्यत्वात् कर्मान्यत्वविशिष्टसत्तादिमान् दोषः समवायाधिकरणगुणनिष्ठाभावप्रतियोगित्वेपि द्रव्यत्वस्य नाव्याप्तिः हेतुतावच्छे
दकसम्बन्धेन हेत्वधिकरणं बोध्यम् तेन समवायेन धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेपि वह्नेर्नाव्याप्तिः
ऽभावस्य प्रतियोगिताव्यधिकरणो ग्राह्यः तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेनैतद्वृक्षवृत्तिकपिसंयोगाभा
वप्रतियोगित्वेपि कपिसंयोगस्य नाव्याप्तिः न च प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा तथैवा

Left margin: तेपि नाव्याप्तिः त्वस्य प्रतियोगिता वच्छेदकत्वे ॥

हेतुसमानाधिकरणो यो नाभावप्रतियोगितावच्छेदकतावच्छेदकसाध्यतावच्छेदकतावच्छेदकावच्छि
न्नावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति कारणतावच्छेदकगौरवाद् इत्यत्र ॥

भावा^
१= अधिकरणभेदेनाभावभेदात्

प्रतियोग्यधिकरण वृत्तिभिन्नत्वम् २=

मु.व
२२

व्याप्तिः प्रतियोगिनः कपिसंयोगस्यानधिकरणे गुणादौ वर्तते यो ऽभावस्तस्यैव हेतुतेसत्तावच्छेदेनसत्त्वात् यदि प्रतियोग्यधि
करणावृत्तित्वं तदा संयोगी सत्त्वादित्यादावतिव्याप्तिः सत्ताधिकरणगुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्ति
त्वादिति वाच्यम् हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्याभावस्य विवक्षितत्वात् प्रतियोग्यनधिकरणीभूतहेत्वधि
करणवृत्त्यभाव इति निष्कर्षः प्रतियोग्यनधिकरणं च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं बोध्यम् तेन विशि
ष्टसत्तावान् जातेरित्यादौ जात्यधिकरणगुणादेर्विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वे ऽपि न क्षतिः अत्र साध्यताव
च्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यम् तेन ज्ञानवान् सत्त्वादित्यादौ सत्ताधिकरणघटादेर्विषयतासम्बन्धेन
ज्ञानाधिकरणत्वे ऽपि न क्षतिः इत्थं च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्त्वे ऽपि न क्षतिः नन्वप्र धूमेनाऽव्याप्तिः
तियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचिदनधिकरणत्वं तत्सामान्यस्य वा यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्ना
नधिकरणत्वं वा विवक्षितम् आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः कपिसंयोगाभावस्य हि प्रतियोगितावच्छे
दकावच्छिन्नो मूलावच्छिन्नः कपिसंयोगो भवति तदनधिकरणं च वृक्ष इति द्वितीये तु प्रतियोगितानधिकरणाभा
वाप्रसिद्धिः सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् न च वह्निमा
न् धूमादित्यादौ घटाभावादेः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वे ऽपि पूर्वक्षणादेः साध्यापि राम
साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यं २२

२= पूर्वक्षणवृत्तित्वविशिष्टस्वस्य घटाभावादेर्यो ऽभावस्तदात्मके इत्यर्थः घटाभावाद्य
धिकरणे ऽपि पूर्वक्षणवृत्तित्वविशिष्टघटाभावादेरभावस्योत्तरक्षणावच्छेदेन सत्त्वात् २=

12

साध्यतावच्छेदकसंबन्धावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणीभूतहेतुतावच्छेदकसं बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणवृत्त्यभावनिरूपितं तादृशप्रतियोगितावच्छेदका वच्छिन्नप्रतियोगिताकत्वं ५ वच्छिन्नप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः॥

१८ अभावाधिकरणकाभावसाधिकरणानतिरिक्तत्वात्

पूर्वलक्षणवृत्तित्ववि शिष्टघटत्वावच्छिन्नाभा वादिभिन्नाभावात्म कत्वार्थः १८

वह्न्यभावे वर्तते यो वह्न्यभावत्वस्य तदभावात्मकतया तदभावस्य वह्निरूपप्रतियोगीनधिकरणं च पर्वतादिरिति क्रमेण प्रतियोगिव्यधि करणत्वस्याप्रसिद्धत्वात् यदि च तदभावाभावो वह्न्यभावादिर्भिन्न इष्यते तथापि समाभाववृत्त्यवृत्त्यभावादित्वाद्यव्याप्तिः तत्र साध्यता वच्छेदकसम्बन्धः स्वरूपसम्बन्धस्तेन सम्बन्धेन सर्वस्यैवाभावस्य पर्वतादौ सत्त्वेन तद्विशिष्टाभावात्मकप्रतियोग्यधिकरणत्वे हेत्वधिक रणस्येति तृतीये तु कपिसंयोगाभावाभावात्मकत्वादित्यादावव्याप्तिः तत्राभावत्वेन कपिसंयोगाभावाभावः कपिसंयोगस्तस्य गु णत्वात् प्रतियोगितावच्छेदकगुणसामान्याभावत्वमपि तदवच्छिन्नानधिकरणं वृक्षे त्वधिकरणस्याप्रसिद्धतेति चेन्न यादृशप्रतियोगितावच्छेद कावच्छिन्नानधिकरणत्वं च हेतुमतस्तादृशप्रतियोगिताकाभावस्य विवक्षितत्वात् न तु कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगि व्यधिकरणाभावाप्रसिद्धिः हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामेवाभावानां साध्यतावच्छेदकसम्बन्धेन कालिक विशेषणतया प्रतियोग्यधिकरणत्वादिति अत्र केचित् महाकालभेदविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरणो महाकालस्य घटा धारत्वेऽपि महाकालभेदविशिष्टघटानाधारत्वात् महाकाले महाकालभेदाभावात् वस्तुतस्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रति योग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धे न तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम् व्यापकसामानाधिकरण्यं व्याप्तिः इत्थं च कालो घटवान् कालपरिमाणादित्यादौ संयोग सम्बन्धेन घटाभावप्रतियोगिनो घटस्यानधिकरणे हेत्वधिकरणे महाकाले वर्तमानस्य संयोगेन घटाभावस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावसत्त्वान्नाव्याप्तिः ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्नत्व मप्रसिद्धं गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न कम्बुग्रीवादिमान्नास्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वविष यीकरणे न गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारात् लघुसमनियतगुरुधर्मस्यानवच्छेदकत्वात् यद्वा हेतुसमानाधिकरणान्योन्या

कपिसंयोगाभावाभावः कपिसंयोगः न तु नियतो गुणसामान्याभावः तथा च साध्यतावच्छेदकत्वे स्व पक्षे वा वह्निस्य गुणसामान्याभावत्वेन यादृशप्रतियोगितावच्छेदकावच्छिन्नं गुणसामान्याभावस्य अनधिकरणीभूतं समवायसंबन्धावच्छिन्नाभावत्वावच्छिन्नाधिकरणा... नियोगित्वाभावो गुणसामान्याभावस्य संताभावो गुणसामान्यं न तु कपिसंयोग सामान्याभावत्वावच्छिन्नप्रतियोगिता तादृशप्रतियोगितानवच्छेद ककपिसंयोगाभावत्वरूपं साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यमा ...

साध्यता प्रतियोगितावच्छेदकसंबन्धेन वह्नि प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्व वच्छेदकसंबन्धावच्छिन्नत्वोभयाभावप्रतियोगिनः संबन्धावच्छिन्नत्वतद्धर्मावच्छिन्नत्वव साध्यसामानाधिकरण्यं व्याप्तिः

सिसाधयिषासत्वेऽपि न पक्षता सिसाधयिषाविरहविशिष्टसिद्धेः सत्वात् न तु परामर्शानन्तरं सिद्धिरतः सि-
साधयिषा तत्र ६।४

भावप्रतियोगितानवच्छेदकसाध्यत्वेनावच्छिन्नवृत्तित्वं व्याप्तिः प्रत्योग्याभावस्याव्याप्यवृत्तित्वाभावात्तत्र प्रतियोगिवैयधिकरण्यं न निवेशयते ऽ
तो व्याप्तत्वमव्याप्यवृत्तेरिव व्याप्यत्वमिति संक्षेपः पक्षवृत्तित्वं लिङ्गस्य पक्षत्वं किं तदाह सिसाधयिषया यत्र सिद्धिर्यत्र न तिष्ठति सपक्षस्तत्र वृत्तित्वं ता-
दृश इति निर्भवेत् १ सिसाधयिषाविरहविशिष्टस्य या सिद्धेरभावः पक्षता तदन्वयव्यतिरेकार्थः सिसाधयिषामात्रं न पक्षता सिसाधयिषां विना
विविक्तस्थनगर्जितमेघोऽनुमानात् प्रत्यक्षसाध्यसंदेहो विना पक्षता विनाऽपि संदेहं घनगर्जितमेघोऽनुमानात् सिद्धौ सत्यामपि सिसाधयिषायां सत्वेऽनुमितिर्भव-
त्येवातः सिसाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणं तथा च यत्र सिद्धिर्नास्ति तत्र सिसाधयिषायां सत्यामसत्यामपि पक्षता यत्र सिसाधयिषा
ऽस्ति तत्र सिद्धौ सत्यामसत्यामपि पक्षता यत्र तु सिद्धिरस्ति सिसाधयिषा काले परामर्शनाशान्नानुमितिः यत्र सिद्धिः परामर्शः सिसाधयिषा क्र-
मेण भवति तत्र सिसाधयिषाकाले सिद्धेर्नाशात्प्रतिबन्धकाभावादेवानुमितिर्यत्र सिसाधयिषा सिद्धिपरामर्शाः सन्ति तत्र परामर्शकाले
सिसाधयिषैव नास्ति एवमन्यत्रापि सिद्धिकाले परामर्शकाले वा न सिसाधयिषा योग्यविभुविशेषगुणानां योगपद्यनिषेधात् कथं सि-
साधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न यत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा ततः सिसाधयिषा त-
त्र पक्षतासंपादनाय तद्विशेषणावश्यकत्वादित्येवं बोध्यम् यादृशसिसाधयिषासत्वे सिद्धिसत्वेऽपि लिङ्गकानुमितिस्तादृशसिसाधयिषाविरह-
विशिष्टसिद्ध्यभावस्तल्लिङ्गकानुमितौ पक्षता तेन सिद्धिपरामर्शसत्वेऽपि किञ्चिज्ज्ञानं जायतामितीच्छायामपि नानुमितिः वह्निव्याप्य-
धूमवान् पर्वतो वह्निमानिति प्रत्यक्षसत्वे प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छायां भवत्येव एवं धूमपरामर्शसत्वे आलोकेन वह्निमनुमिनुया-
मितीच्छायामपि नानुमितिः सिसाधयिषाविरहकाले यादृशसिद्धौ नानुमितिस्तादृशी सिद्धिर्विशेष्यैवं क्रमव्याप्तेः तेन पर्वतस्तेजस्वी पाषाण-
मयो वह्निमानिति ज्ञानसत्वेऽप्यनुमितिर्न विरोधः परं तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्-
शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन सिद्धिरेव प्रतिबन्धिका॥ पक्षतावच्छेदकसामानाधिकरण्येना-

शान्तसामग्र्या
प्रमत्ते ~ ०

यादृशं

तथाऽन्याद्रशसिद्धेरेव
गत्वम् ~ ३

उपाध्यायास्तु विसाधविर्ष विर इति विशिष्टसिद्धिप्रत्यक्षसामग्री अत्र तत्स्याभावः यत्र यातेन सिद्धिकाले
समानविषयकप्रत्यक्षसामग्रीकालेपि च नानुमितिरित्याऊ सद्धूमक्षितसति हेतुमाह इत्येतिति १८

५२ मनु विशेष्यतासाधम्यप्रकार
कतिस्वयत्वेन विरोधित्वम् १८

अनुमितिप्रतिबन्धकत्वमात्रं विरोधि इत्येके तन्न यत्रायं ह्रदो न वेति संशयानन्तरं ह्रदत्वव्याप्यकरादिमानिति ज्ञानं तत्रास
स्यानुमित्याद्युत्पत्तव्यत्वेप्रसक्तं भवति न त्वनुमितिः अतोऽनुमित्याविरुद्धविशिष्टसमानविषयकप्रत्यक्षसामग्रीकामितो जिता।
सादिवत्वान्तर्गणप्रतिबन्धिका एवं परामर्शानन्तरं विनाप्रत्यक्षेच्छापत्त्यादिप्रतिबन्धात् अतस्तेच्छाविरहविशिष्टानुमि
तिसामग्रीभिन्नविषयकप्रत्यक्षप्रतिबन्धिकेति संक्षेपः हेत्वाभासान्विभजते अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः
कालात्ययापदिष्टश्च हेत्वाभासास्तु पंचधा तत्र ज्ञानेन यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम् तथाहि व्यभिचा
रादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वाद्दोषः यद्विषयकत्वं च यादृशविशिष्टविषयकत्वं बोध्यम् तेन बाधभ्रमा
स्यानुमितिविरोधित्वेपि नन्वयं पर्वतो वह्न्यभाववानिति विशिष्टस्याप्रसिद्धत्वादितिनदे हेत्वदोषः न च यत्र वह्न्यभावव्याप्यपु
ष्पाणमयं त्ववानिति परामर्शकाले वह्निव्याप्यधूमस्याभासत्वेन स्यात् नच वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्श
पाषाणमयत्ववान्
काले वह्निव्याप्यधूमस्याभासत्वं न स्यात् तत्र वह्न्यभावव्याप्यवान्पर्वत इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम् इष्टापत्तेः
अव्यवहितबाधस्यानित्यदोषत्वापत्तेः तस्मात्तत्र वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्निव्याप्यधूमस्य
भानाभासत्वं भ्रमात्मानुमितिप्रतिबन्धमात्रे हेत्वन्तर्गतत्वम् इति इत्यत्र साध्याभाववद्वृत्तिहेत्वादिकं दोषः तद्वत्त्वाच्च
हेतोर्येनकेनापि संबन्धेनेति नव्याः परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वं सत्प्रतिपक्षे
विरोधिव्याप्त्यादिकमेवं तथा तद्वत्त्वं च हेतोर्ज्ञानरूपसम्बन्धेन नचैवं पर्वतो वह्निमान् धूमादित्यादौ पक्षे बाधभ्रमस्य सा
ध्याभावविषयकत्वेनानुमितिविरोधित्वात् ज्ञानरूपसम्बन्धेन सद्धेतुत्वस्यापि सत्त्वात् सद्धेतावपि बाधितत्वापत्तिरिति वा
च्यम् तद्ज्ञानस्य सम्बन्धत्वाकल्पनात् अयं सत्प्रतिपक्ष इति व्यवहारे ऐशाकल्पनात् तत्र बाधितव्यवहारादिमाङः अ

वा धकाकालीनेधूमादिसद्धेतौ — मतिपरामर्शकालीनेसद्धेतौ — ते — ज्ञानस्य संबंधत्व — बाधभ्रमकालीनसद्धेतौ — भावा

स्य

बाधितः

इत्यादि

ऊडे ताव सिद्धत
व्यवहारात्
कुत सति विदोष
त्व

वह्न्यभावव्याप्य
दिक संशयमात्मभवती
त्ताव

अनुमितेर्यद्यानुरु
धत्वं तद्विषयविषयः
तथाश्रयत्वमपि २

दोषवत्त्वम्
तद्वत्त्वमिति यद्यः १८

साध्याभाववि
शिष्टः पक्षो बाधः

पाषाणमयत्ववान्पर्व
व्याप्यवानिति विशिष्ट

स्यादिनाम्याभावस्य
ज्ञाः

हेतौ हेतुत्वाभावस्य
बाधस्याश्रयत्वासंबन्धेन
कुत्रचिदेकत्रानवियत्वसंबन्धे

नुमितिविरोधित्वं चानुमितितत्करणान्यतरविरोधित्वं तेन व्यभिचारिणि ज्ञानाव्याप्तिः दोषत्वानं च यद्धेत्वविषयकं त
द्धेतुकानुमितेः प्रतिबंधकं तेनैकहेतौ व्यभिचारज्ञाने हेत्वन्तरेणानुमित्युत्पत्तेः तदभावाद्यनवगाहित्वाच्च व्यभिचारज्ञा
नस्यानुमितिविरोधित्वाभावेपि न हानिरिति संक्षेपः यादृशसाध्यपक्षकहेतौ यावन्तो दोषास्तावदन्यान्यत्वं तत्तद्धेत्वा
भासत्वम् एतल्लक्षणं तत्तन्मत एव स्थलाभिप्रायेण आद्यः साधारणस्तथाऽसाधारणकोपरः तथैवानुपसंहारीति त्रि
धानैकान्तिको भवेत् ॥७१॥ एवं साधारणाद्यन्यतमत्वमनैकान्तिकत्वम् साधारणः साध्यवदन्यवृत्तिः तेन च व्याप्ति
ग्रहप्रतिबन्धः क्रियते असाधारणः साध्यासमानाधिकरणो हेतुः शब्दो नित्यः शब्दत्वादित्यादौ तेन साध्यसामानाधि
करण्यग्रहः प्रतिबध्यते अन्ये तु सपक्षावृत्तिरसाधारणः सपक्षश्च निश्चितसाध्यवान् इत्थं च शब्दो नित्यः शब्दत्वादित्या
दौ घटादिपक्षे साध्यनिश्चयदशायामसाधारण्यं न तु हेतुनिश्चयादित्यपि वदन्ति अनुपसंहारी चात्यन्ताभावाप्रतियोगिसा
ध्यकादिः अनेन च व्यतिरेकव्याप्तिज्ञानप्रतिबन्धः क्रियते विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी अयं च साध्याभा
वग्रहसामग्रीकत्वेन प्रतिबन्धकः सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः अत्र तु हेतुरेवेति विशेषः ५ साध्याभाव
साधक एव हेतुः साध्यसाधकत्वेनोपन्यस्त इति अयं प्रकृतविशेषोपस्थापकत्वाच्च विशेषः सत्प्रतिपक्षः साध्याभावव्या
प्यवान् पक्षः अगृहीताप्रामाण्यकसाध्यव्याप्यवत्तोपस्थितिकालीनागृहीताप्रामाण्यकं [illegible] तदभाव
व्याप्यवत्तोपस्थितिविषयः पक्ष इत्यन्ये अत्र च परस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबन्धः फलम् अत्र के
चित् यथा ह्रदाभावव्याप्यवत्ताज्ञाने विद्यमानेपि ह्रदवह्निसंयोगे सति ह्रदत्ववत्ताज्ञानं जायते यथा च शंखे पीतत्वा
भावव्याप्यशंखत्ववत्ताज्ञानेपि सति पित्तादिदोषे पीतः शंख इति धीर्जायते ॥ एवं कोटिद्वयव्याप्यदर्शनेपि कोटिद्वयस्मर २४

व्यभिचारिणि ना व्याप्तिः २ वस्तु तं न्यवाक्येतादि त्वा दो सर्वहेत्वाभास संभव इति =

पदेसाध्याभाव =

स्थाणुत्वपुरुषत्वरूपसाध्यद्वयं वक्रकोटरादिकरादिदर्शने १= व्याप

ननु यत्र क्रमयमासक्तेर्ननु भयमानं तदापि ज्ञानादिदोषसत्वे पीतत्वशङ्खत्वेऽस्य तोऽप्रमाणोऽनापत्तिरित्यत आह फलबलेनचेति तथाच तत्र
पीतत्वसंसर्गाकारस्येवानुभावस्य ... तथा शङ्खत्वादेपि तद्रूपदोषस्य प्रतिबंधकत्वकल्पने विनापीतत्वाकारसामग्र्या अधिकब
लत्वमेवं हेतुत्वदोषसत्वेपि स्थाणुत्वपुरुषत्वयोः स्फूर्तिसंशयस्योदयात् तत्सामग्र्याः समबलत्वमेव कल्प्यत इति भावः = २ =

स्तद्रूपः संशयो भवति तथा समानतिपन्नस्थले संशयाय रूपानुमितिर्भवत्येव यत्रचैककोटिव्याप्यदर्शनं तत्राधिकबल
तया द्वितीयकोटिज्ञानप्रतिबंधान्न संशयः फलबलेन चाधिकबलसमबलभावकल्पनं हृदयाङ्कः तत्र तदभावव्या
प्यवत्ताज्ञाने सति तदुपनीतभानविशेषस्यानुबोधादेव तद्यालौकिकसन्निकर्षजन्यदोषविशेषाजन्यज्ञानमात्रेत(
स्य प्रतिबंधकतालाघवात् तदुपनीतभानविशेषस्यानुबोधे च प्रत्यक्षप्रतिबंधकतागौरवात् तथाच प्रतिबंधक
सत्वात्कथमनुमितिः तत्र लौकिकसन्निकर्षस्थलेप्रमदन्नमिव समानतिपन्नस्थले संशयाकारानुमितिः प्रामाणिकी
येनानुमितिर्भिन्नत्वेनापि विशेषणीयस्य यत्रचकोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात्संशयः नान्य
था अगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबंधकत्वादिति असिद्धस्त्वाश्रयासिद्ध्याद्यनन्तरमः आश्रयासि
द्धिः पक्षतावच्छेदकस्याभावः यत्र काञ्चनमयः पर्वतो वह्निमानिति साध्यते तत्र पर्वते न काञ्चनमय इति ज्ञा
ने विद्यमाने काञ्चनमयपर्वते परामर्शप्रतिबंधः फलम् स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः यत्र ह्र
दो द्रव्यं धूमवत्वादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्र
तिबंधः फलं साध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिमध्ये अन्तर्भूताः साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः
एतज्ज्ञाने सति च काञ्चनमयवह्निमानित्यादौ साध्यतावच्छेदकविशिष्टसाध्यपरामर्शप्रतिबन्धः फलम् एवं हे
तौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः यथा काञ्चनमयधूमादित्यादौ अत्रच हेतुतावच्छेदकविशिष्टहेतु
ज्ञानस्याभावात् तद्धेतुकस्य व्याप्तिज्ञानादेरभावः फलम् एवं वह्निमान्नीलधूमादित्यादौ तत्र यानीलधूमत्व

तीयोऽपि विभागजः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति आद्यस्तावद्यत्र कपाले कर्म ततः कपा देशान्तरे २=
लद्वयविभागस्ततो घटारम्भकसंयोगनाशस्ततो घटनाशस्तेनैव कपालविभागेन सकर्मणः कपालस्याकाशादिवि
भागो जन्यते तत आकाशादिसंयोगनाशः तत उत्तरदेशसंयोगस्ततः कर्मनाश इति न च तेनैव कर्मणा कथं देशान्तर

क्रियान्तरवतः

विभागो न जन्यत इति वाच्यम् एकस्य कर्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिद्वन्द्विवि
भागजनकत्वस्य च विरोधात् अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात् तस्मादादौ कर्मणानारम्भकसंयोगप्रतिद्वन्द्विवि
भागं जनयेत् तदारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत् तदारम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयेत् न च कारणविभागे
नैव द्रव्यनाशात् पूर्वं कृतो देशान्तरविभागो न जन्यत इति वाच्यम् आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये समवेते द्रव्ये
देशान्तरविभागासम्भवात् द्वितीयस्तावत् यत्र हस्तक्रियया हस्ततरुविभागस्ततः शरीरेऽपि विभक्तप्रत्ययो भवति तत्र च श
रीरतरुविभागे हस्तक्रिया न कारणं व्यधिकरणत्वात् शरीरे तु क्रिया नास्त्येव अवयविकर्मणोऽवयवकर्मनियत
त्वात् अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यत इति अत एव विभागो गुणान्तरम् अन्यथा शरीरे विभ
क्तप्रत्ययो न स्यात् अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति प
रत्वं चापरत्वं च द्विविधं परिकीर्तितम् दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् परत्वं देशसंयोगभूयस्त्वज्ञानतो भवेत् अप
रत्वं तदल्पत्वबुद्धितः स्यादितीरितम् २२ दैशिकं परत्वं तु तरदेशसंयोगान्तरितत्वज्ञानादुत्पद्यते एवं तदल्पीयस्त्वज्ञानादप
रत्वमुत्पद्यते अत्रावधित्वं चापेक्षा यथा पाटलिपुत्रात्काशीमपेक्ष्य प्रयागः परः कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति तयोरस
मवायी तु दिक्संयोगस्तदाश्रये तयोर्दैशिकपरत्वापरत्वयोरसमवायी असमवायिकारणम् तदाश्रये दैशिकपरत्वा
परत्वाश्रये दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् २३ परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः अत्र त्वसमवायी स्यात्सं
योगः कालपिण्डयोः २४ अत्र परत्वापरत्वे तु कालिके ग्राह्यम् यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यपरिस्पन्दाधिकः स २१

जन्यद्रव्ये

ज्येष्ठः यस्य स तु सः कनिष्ठः कालिकपरत्वापरत्वे जन्यद्रव्यस्यैव अत्र कालिकपरत्वापरत्वयोः अपेक्षाबुद्धिना
शेन तेषां नाशो निरूपितः तेषां कालिकदैशिकपरत्वापरत्वानाम् क्रमप्राप्तां बुद्धिं निरूपयति बुद्धेः प्रपंचः प्रागेव प्रा
यशो विनिरूपितः २५ अथावशिष्टोऽप्यपरः प्रकारः परिदर्श्यते अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते २६ तत्राप्रमां
निरूपयति तच्छून्ये तन्मतिर्यास्यादप्रमा सा निरूपिता तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः तत्प्रपंचो विपर्यासः सं
शयोऽपि प्रकीर्तितः तत्प्रपंचः अप्रमाप्रपंचः आद्यो देहे आत्मबुद्धिः शंखे पीततामतिः भवेन्निश्चयरूपासौ आद्यो विपर्या
स इत्यर्थः शरीरादौ निश्चयरूपं यदात्मत्वप्रकारकं ज्ञानं गौरोऽहमित्याकारकम् एवं शंखादौ पीतः शंखः इत्याकारकं यज्ज्ञा
नं निश्चयरूपं तद्भ्रम इत्यर्थः संशयोऽथ प्रदर्श्यते २८ किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः किंस्विदिति वितर्के
निश्चयलक्षणमाह तदभावाप्रकाराधीस्तत्प्रकारा तु निश्चयः तदभावाप्रकारकं तत्प्रकारकं ज्ञानं निश्चय इत्यर्थः संश
यलक्षणमाह स संशयो मतिर्यास्यादेकत्राभावभावयोः एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः सा
धारणादिधर्मस्य ज्ञानं संशयकारणम् ३० उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम् यथा उच्चैस्तरत्वं स्थाणुपु
रुषसाधारणं ज्ञात्वा अयं स्थाणुः पुरुषो वेति संदिग्धे एवमसाधारणधर्मज्ञानमपि कारणम् यथा शब्दत्वं नित्यानित्यव्यावृत्तम
विशिष्टं शब्दे गृहीत्वा शब्दो नित्यो न वेति संदिग्धे विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिवाक्यं लौकिकानां संशयकारणं शब्दस्यानित्य
नादीनां निश्चयमात्रजनकत्वस्याभावात् किं तत्र शब्दे न कोटिद्वयज्ञानं जन्यते संशयस्तु मानस एवेति एवं ज्ञाने प्रा
माण्यसंशयादपि विषयसंशय इति एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम् किंतु संशये धर्मिज्ञानं धर्मीन्द्रि

विशिष्टादिबहुतरमस्तनीयं स्मृतिः इति विस्तारः

मुक्त. ३८

यत्सन्निकर्षो वा कारणमिति चेन्न दोषः प्रमायां जनकः प्रमायामपि गुणो भवेत् अप्रमां प्रति दोषः कारणम् प्रमां प्रति तु गुणः
कारणम् अन्यथा पित्तादिदूरत्वादिरूपदोषाणामननुगतत्वात्तेषां कारणत्वम् अन्वयव्यतिरेकाद्देव सिद्धं गुणस्य प्रमाजनकत्वं त्वनुमाना
त्सिद्धम् यथा प्रमाज्ञानसामान्यकारणभिन्नकारणजन्या जन्यज्ञानत्वादप्रमावत् न च दोषाभाव एव कारणमस्त्विति
वाच्यम् पीतः शङ्खः इति ज्ञानस्थले पित्तरूपदोषसत्त्वात् शङ्खे श्वेतप्रमानुत्पत्तिप्रसङ्गात् विनिगमनाविरहात् ननु दोषाभावका
रणत्वमपेक्ष्य गुणकारणताया न्याय्यत्वाच्च न च गुणसत्त्वेपि पित्तेन प्रतिबन्धात् हेतुहेतुमद्भावेन श्वेतज्ञानमतः पित्तादिदोषाभावा
नां कारणत्वमवश्यं वाच्यम् तथा च किं गुणस्य हेतुत्वकल्पनेनेति वाच्यम् तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्व
सिद्धेः एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि संभवत्वात् नच दोषाः के इत्याकाङ्क्षायामाह पित्तदूरत्वादिरूपो दोषो ना
नाविधो मतः क्वचित्पीतादिभ्रमे पित्तं दोषः क्वचिच्च दोषो रागाः भ्रममण्डूकवसाञ्जनमित्येवंरूपा दोषा अननुगता एवेत्याति
जनकारत्यर्थः अथ के गुणा इत्याशङ्कायां प्रत्यक्षादौ क्रमेण गुणान्दर्शयति प्रत्यक्षे तु विशेष्येण पक्षे साध्यविशिष्टत्वपरा
मर्शो गुणो भवेत् अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुणः एवमग्रेपि ज्ञेयम् शाब्दे सादृश्यबुद्धिस्तु भवेदुपमितौ
गुणः शाब्दबोधे योग्यताया ज्ञानं यथार्थं वा प्रमा गुणः स्यात् प्रमां निरूपयति भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ननु घटा
शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् अत आह अथवा तत्प्र
कारकं ज्ञानं तद्विशेष्यकम् तत्प्रमा तद्विशेष्यकत्वे तत्प्रकारकं ज्ञानं प्रमेत्यर्थः अथैवं स्मृतेरपि प्रमात्वे स्यात् अतः किमिति
चेत्तथा सति तत्करणस्यापि प्रमाणान्तरत्वं स्यादिति चेन्न यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात् इदं तु बोध्यम् ये

क्वचिच्चरा [illegible]

त्वेमति ८२

तत्सम्बन्धेन तद्वत्ता तेन सम्बन्धेन तद्विशेष्यकत्वं तेन सम्बन्धेन तत्प्रकारकत्वं वाच्यम् तेन कपाले घटादौ संयोगादिना घटा
दिज्ञाने नातिव्याप्तिः एवं सति निर्विकल्पकं प्रमा न स्यात् तस्य सप्रकारकत्वाभावादत आह न प्रमा नापि भ्रमः स्यान्निर्वि
कल्पकम् २५ प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत् ननु एकत्वे कपिसंयोगज्ञाने भ्रमः प्रमा च स्यादिति चेन्न प्रतियोगिव्यधि
करणसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात् न च कपिसंयोगाभावावच्छेदकावच्छेदेन संयोगज्ञाने भ्रमो न स्यात् तत्र
संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वाच्यम् तत्र संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् ल
क्षणान्तरमाह तत्त्वाननुगमात्वाननुगमेषि न तत्त्वैः प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः मीमांसकमते प्रमात्वं स्वतो ग्राह्यमि
ति तन्मते ज्ञानस्य स्वतः प्रकाशरूपत्वात् ज्ञानप्रामाण्यं तेनैव गृह्यत इति भट्टानां मते ज्ञानमतीन्द्रियं ज्ञानजन्या ज्ञातता
प्रत्यक्षा तया च ज्ञानमनुमीयते मुरारिमिश्रमते अनुव्यवसायेन ज्ञानं गृह्यते सर्वेषां मते अपि तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामा
ण्यं गृह्यते विषयनिरूप्यं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषयः तथा च ज्ञाने गृह्यमाणे तद्वद्विशेष्यकत्वं तत्प्रकारकत्वं सविशेषकत्वं
गृह्यत इति तद्वान्तरमतत्त्वम् तथा च सति इदं विशेष्यकत्वं न गृह्यते विशेष्ये घटत्ववैशिष्ट्यस्य गृहीतत्वात् घटविशेष्य तद्वद्
कत्वग्रहे बाधकाभावादिति तन्मतं दूषयति तस्येति संशयेति यदि ज्ञानस्य प्रामाण्यं स्वतो ग्राह्यं स्यात्तदानभ्यासदशा
पन्नज्ञाने प्रामाण्यसंशयो न स्यात् तत्र हि यदि ज्ञानं ज्ञातं तदा तन्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः यदि ज्ञानं न ज्ञातं त
दा धर्मिज्ञानाभावात् कथं संशयः तस्मात् ज्ञाने प्रामाण्यमनुमेयम् तथा हि इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् यन्नैवं त
न्नैवं यथाप्रमा इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात् एवमिदं जलत्वप्रकारकं ज्ञानं प्रमा

रूपत्वार्थे तत्र प्रामाण्यग्रहो वाच्यः सोप्यनुमितं तत्रैवेति यत्तमुखीकारणानुखीज्ञानवस्थेति चेन्न अगृहीतप्रामाण्यकज्ञानस्यैव निश्चय ८५

तद्वति तत्त्वप्रकारकं ज्ञानं [illegible])त्वात् न च तेन ज्ञानं
मुद्र. ११ कथं ज्ञातमिति वाच्यम् पृथिवीत्वप्रकारकत्वस्य स्वतो ग्राह्यत्वात् न च गन्धप्रकारेण गन्धवद्विशेष्यकत्वस्यापि स्वग्राह्यत्वात् तत्प्र
कारकत्वावच्छिन्नतद्विशेष्यकत्वपर्यन्तं गृह्यते संशयानुरोधात् न च प्रमात्वस्य साध्यस्य प्रसिद्धिः कथमिति वाच्यम् ज्ञानप्रमा ३दं
३१ त्वस्य स्वतो ग्राह्यत्वात् न च प्रकारकभेदेन प्रामाण्यभेदात् घटत्ववति प्रकारोऽयं कथं प्रसिद्धिरिति वाच्यम् घटत्वप्रकारक
त्वस्य विशेष्यकत्वस्य च स्वतो ग्राह्यत्वात् । घटस्य च सर्वेषुपस्थितत्वात् घटविशेष्यकं घटत्वप्रकारकमिति ज्ञाने बाधका
प्रथमानुव्यवसायेन = भावः अवसायेपरं तत्र गृह्यते तत्र संशयसामग्रीसत्वे संशयस्यैवोत्पत्तेः किं चाभ्यासदशापन्नतीयानुव्यवसायादिनाप्रा
माण्यस्य स्वतस्त्वस्य च संभवात् प्रथमानुव्यवसाये परं न तत्प्रकारकत्वमिति कल्प्यते संशयानुरोधात् अथ प्रामाण्यानुमितौ प्रामा
अनुमितेः = ण्याग्रहेण तत्संविषयनिश्चयरूपत्वमतत्स्वरूपो वाच्यः सोप्यनुमितिस्वरूपेण एवं प्रामाण्यानुमितिजनकत्वेन ज्ञानादेर्विषयनि
श्चयरूपत्वात् यत्र तु प्रामाण्यसंशयस्तत्रैव परं प्रामाण्यानुमितेरपेक्षा यावदाशंकं प्रामाण्यानुमितिरिष्यतएव सर्वत्रतु न संश
प्र यः क्वचित्कोटेरनुपस्थितेः क्वचिद्विशेषदर्शनादितः क्वचिद्विषयान्तरसञ्चारादिति संक्षेपः न तु सर्वेषां ज्ञानानां यथार्थत्वात्
प्रा मात्वं लक्षणे तद्वद्विशेष्यकत्वे विशेषणं व्यर्थम् न च रजते रजतार्थिनः प्रवृत्तिर्भ्रमजन्यज्ञानस्यान्यथामते भ्रमस्याभावादिति वाच्यम् तत्र
द्दिरोपाधीनस्य पुरोवर्तिनि स्वतन्त्रोपस्थितिर्जनकभेदाग्रहस्य हेतुत्वात् सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्वात् तदेव कारणम्
रजतं अवश्यत्वात् ताभिमेदाग्रहस्यैव कारणम् न चान्यथाख्यातिः संभवति । रजतप्रत्यक्षकारणस्य रजतसन्निकर्षस्याभावात् एवं रज
तबुद्धेरनुपपत्तेरिति चेन्न सत्यरजतस्थले प्रवृत्तिप्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वात् असत्ख्यातिकल्पनात् नच सं ३९

वस्तुः संयुक्तसमवाया रजतत्वेन समवितकर्षः

वादिप्रवृत्तौ न कारणं वादिप्रवृत्तौ न भेदाग्रहः कारणमिति वाच्यम् लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् इत्थं च
रङ्गरजतत्वविशिष्टबुद्ध्या विरोधेन ज्ञानलक्षणाप्रत्यासत्तिकल्पने विनष्टतिः फलमुखगौरवस्यादोषत्वात् किञ्च यत्र रङ्गरज-
तयोरिमे रजते रङ्गे इति वा ज्ञाने जाते न भ्रमन कारणबाधोऽपि अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञाने जाते तत्रोभया-
भ्युपगमप्रवृत्तिनिवृत्ती स्यातां रङ्गे रङ्गभेदग्रहे रजते रजतभेदग्रहे त्वप्रवृत्त्यापत्तिभयात् त्वन्मते रङ्गे रङ्गभेदाग्रहस्य रजते र-
जतभेदाग्रहस्य च सत्त्वात् दोषाद् इत्थं रङ्गे रजते भेदाग्रहस्य रजते रङ्गभेदाग्रहस्य च सत्त्वात् किं चानुमितिप्रतिभेदाग्रहस्य
हेतुत्वे पर्वते वह्निव्याप्यधूमवद्भेदाग्रहादनुमितिर्निराबाधा यदि च विशिष्टज्ञानं कारणं तदा घोमोलके वह्निव्याप्यधूमसामान-
नुमितेरनुरोधाद्दापत्तिः स्यादेवमुभयतः पाशारज्जुः इत्थं चान्यथाख्यातौ प्रत्यक्षमेव प्रमाणं रङ्गरजतयोर्वेदितमित्यनुभवा-
दिति संक्षेपः सर्वं व्याप्तिग्रहोपायस्तन्न दर्शितमित्यत आह दर्शयति व्यभिचारस्य ग्रहाय सहचाराग्रहस्य च हेतुत्वमि-
ग्रहेत्यर्थकः क्वचिच्छङ्कानिवर्तकः। व्यभिचाराग्रहः सहचारग्रहश्च व्याप्तिग्रहे कारणमित्यर्थः व्यभिचारग्रहस्य व्याप्तिग्रहे प्रति-
बन्धकत्वात् तदभावः कारणम् एवमन्वयव्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुता भूयोदर्शनेन कारणं व्यभिचारास्फूर्तौ
सहदर्शनेऽपि क्वचिद्व्याप्तिग्रहात् क्वचिद्व्यभिचारशङ्काविधूननद्वारा भूयोदर्शनमुपयुज्यते यत्र तु भूयोदर्शनादपि शङ्का
नापैति तत्र विपक्षबाधकतर्कोऽपेक्षितः तथा हि वह्निविरहिण्यपि धूमः स्यादिति यद्याशङ्का भवति तदा सा वह्निधूमयोः का-
र्यकारणभावस्य प्रतिसन्धानान्निवर्तते यद्ययं वह्निमान्न स्यात्तदा धूमवान्न स्यात् कारणं विना कार्यानुपपत्तेः यदि च क्वचि-
त्कारणं विनापि कार्यं भविष्यति अहेतुक एव वा भविष्यतीति तत्राशङ्कायां व्याघाताभिसन्धिस्तदा सा व्याघातादपसरणीया यदि कारणं

स्या।

हि।

तद्दर्शनके कारणीभूतकार्य | यदि धूमो वह्निव्यभिचारी स्यात्तदा वह्नि-
कारणभावग्रहे ति– ८ | जन्यो न स्यादिति तर्कोऽकारणैवाध्याः २२

९- नवैवनस्यात्

श्री. विनाकार्यं स्यात् तदुक्तम् अर्थविकल्पः स्यंर्थेभोजनस्यानियमनउपादानेनैवस्यादिति एवंसतिपर्वशंकानावतरतीत्यत्रनतर्कोपे
४०. क्षेति तदिदमुक्तंतर्कः क्वचिच्छंकानिवर्तकइति इदानींपरकीयव्याभिचारप्रतिबन्धार्थमुपाधिंनिरूपयति साध्यस्यव्या

पकोयस्तुहेतोरव्यापकस्तथा सउपाधिर्भवेत्तस्यनिष्कर्षोऽयंप्रदर्श्यते साध्यत्वाभिमतव्यापकत्वेसतिसाधनत्वाभिमतोऽ

व्यापकत्वमुपाधित्वमित्यर्थः नन्वस्यापामोमित्रातनयत्वादित्यत्रशाकपाकजत्वेनोपाधिः स्यात्तस्यसाध्यव्यापकत्वाभावात्

श्यामत्वस्यघटादावपिसत्वात् तत्रशाकपाकजत्वाभावात् एवंवायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्रोद्भूतरूपवत्वे

नोपाधिःस्यात्प्रत्यक्षत्वस्यात्मादावपिसत्वात् तत्रचरूपाभावात् एवंध्वंसोविनाशीजन्यत्वादित्यत्रभावत्वेनोपाधिःस्याद्धि

नाशित्वस्यप्रागभावेसत्वात् तत्रचभावत्वाभावादितिचेन्न यद्धर्मावच्छिन्नसाध्यव्यापकत्वंतद्धर्मावच्छिन्नसाधनाव्यापकत्वमि

त्यर्थतात्पर्यात् मित्रातनयत्वावच्छिन्नश्यामत्वस्यव्यापकंशाकपाकजत्वमेव एवंबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्यव्यापकमुद्भूत

रूपवत्वंबहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकंचैव एवंध्वंसोविनाशीजन्यत्वात् इत्यत्रजन्यत्वावच्छिन्नसाध्यव्यापकत्वंभावत्व

म् सद्धेतौतुएतादृशधर्मोनास्ति यद्धर्मावच्छिन्नसाध्यव्यापकंतद्धर्मावच्छिन्नस्यसाधनस्यचाव्यापकंकिंचित्स्यात् व्यभिचारित्वेत्व

न्वेतउपाध्यधिकरणेयत्साध्याधिकरणंयत्रोपाधिशून्यंसाध्यव्यभिचारेनिरूपकमधिकरणंतदन्यतरत्वावच्छिन्नस्यसाध्यस्यव्या

पकत्वेसाधनस्यचाव्यापकत्वमुपाधेःसंभवतीति अतएवलक्षणमप्युपाधिस्वरूपमेतदनुसारेणदर्शयति सर्वेसाध्यसमानाधि

करणाःस्युरुपाधयः हेतोरेकाश्रयेयेषांस्वसाध्यव्यभिचारिता सचसाध्यंचस्वसाध्यंतद्योर्व्यभिचारितेत्यर्थः उपाधेर्दूषकता

वीजमाह व्यभिचारस्यानुमानमुपाधेस्तुप्रयोजनम् उपाधिव्यभिचारेणहेतौसाध्यव्यभिचारानुमानमुपाधेःप्रयोजनमित्यर्थः ४०.

तायुःप्रत्यक्षोद्रव्यत्वादित्यादावात्मत्वाननाम्यतरत्वावच्छिन्नसाध्यव्यापकत्वस्योद्भूतरूपेऽभावादुक्तमुपाध्यधिकरणमिति एतस्यएवात्मत्वाम्यतरत्वावच्छिन्नसाध्याप्रसिद्धेरतःसाध्याधिकरणमिति

धटोदित्वनित्यद्रव्यत्वादिपक्षेवाच्छिन्नसाध्यव्यापकत्वाभावाद्यत्नेयत्नेस्यादि परमाणुघटान्यतरत्वावच्छिन्नद्रव्यत्वात्मकसाधनव्यापकत्वादुपाधिस्यनमिति घटात्मान्यतरत्वादवच्छिन्नसाध्यव्यापक

त्वाभावात्साध्यव्यभिचाराधिकरणमिति घटातीन्द्रियरूपान्यतरत्वावच्छिन्नद्रव्यत्वेरूपसाधनाव्यापकत्वस्योद्भूतरूपेऽभावात्साध्याभावाधिकरणमितिपरित्यक्तसाध्यव्यभिचाराधिकरणमित्युक्तम् तद

तथाहि यत्र हेतुः साध्यव्यापक उपाधिव्यभिचारेण हेतौ साध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः। तत्र शुद्धेनोपा
धिव्यभिचारेण साध्यव्यभिचारानुमानं यथा धूमवानग्नेरित्यादौ वह्निर्धूमव्यभिचारी तद्व्यापकार्द्रेन्धनव्यभिचारित्वात्
इति व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यकत्वात् यत्र तु किंचिद्धर्मावच्छिन्नसाध्यस्य व्यापक उपाधिस्तत्र तद्धर्मवति
उपाधिव्यभिचारेण साध्यव्यभिचारानुमानं यथा स श्यामो मित्रातनयत्वादित्यादौ मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातन
ये शाकपाकजत्वव्यभिचारादिति बाधानुन्नीतपक्षेतरत्वं साध्यव्यापकत्वग्राहकप्रमाणाभावात् स्वव्याघातकतया च नोपाधिः
बाधोन्नीतपक्षेतरस्तूपाधिर्भवत्येव यथा वह्निरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वह्नेरुष्णत्वग्रहे वह्नीतरत्वमुपाधिः यत्र
तूपाधेः साध्यव्यापकत्वादिकं संदिह्यते स संदिग्धोपाधिः पक्षेतरत्वं संदिग्धोपाधिरपि नोद्भावनीयः कथकसंप्रदायानु
रोधात् केचित्तु सत्प्रतिपक्षोत्थापनमुपाधिफलम् तथाहि अयोगोलकं धूमवद्वह्नेरित्यादौ अयोगोलकं धूमाभाववदार्द्रेन्ध
नाभावादिति सत्प्रतिपक्षसम्भवात् इत्थं च साधनव्यापकोऽपि क्वचिदुपाधिः यथा करका पृथिवी कठिनसंयोगवत्त्वादित्या
दौ अनुष्णाशीतस्पर्शवत्त्वम् न चात्र स्वरूपासिद्धिरेव दूषणमिति वाच्यम् सर्वत्रोपाधेर्दूषणान्तरसाङ्कर्यात् अत्र च साध्यव्याप
कः पक्षावृत्तिरुपाधिरिति वदन्ति शाब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते अनुमानगतार्थत्वादिति वैशेषिकं मतम्
वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणे शाब्दोपमानयोरनुमानविधयैव प्रामाण्यम् तथाहि दण्डेन गामानयेति पदानि वै
दिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वात् वर्त्तमानघटेति पदकद
म्बकवत् यद्वा एते पदार्था मिथः संसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वात् [illegible] दृष्टान्तेऽपि दृष्टान्तान्तरेण सा।

(Margin, left:) जपात्वं विनाशित्व व्यभिचारि जपात्व वति भावत्वव्यभि चारात् =५ कार्येन साध्यव्याप कत्वग्राहिप्रमाणाभावात्

(Margin, left:) साधनव्यापकं कठिनसंयोगव त्त्वव्यापकानुष्णाशीत स्पर्शवत्त्वमिति [illegible]

(Margin, right:) हेतौ साध्यव्यापकोपा [illegible] मित्रातनयत्ववति =

(Margin, right:) करका न पृथिवी अनुष्णाशीतस्पर्शवत्त्वात् सत्प्रतिपक्षोत्थापकत्वं =५

(Margin, bottom:) योग्यतासत्ति [illegible]

मु.व. ध्यासिद्धिरिति एवं गवयव्याप्तिसमवाप्तस्य गवयपदं गवयत्वप्रवृत्तिनिमित्तकं असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वा
धी त् असति वृत्त्यन्तरे यद्यत्र वृद्धैः प्रयुज्यते तत्र तत्त्वप्रवृत्तिनिमित्तकं यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम् यद्वा गवयपदं तत्त्व
५१ प्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमानेन पदधर्मताबलात् गवयत्वप्रवृत्तिनिमित्तकत्वं सिद्ध्यतीति तन्मतं दूषयति त
न्न सम्यग्विना व्याप्तिबोधं शाब्दादिबोधतः ॥ व्याप्तिज्ञानं विना शाब्दादिबोधस्यानुभवसिद्धत्वात् नहि सर्वत्र शब्दश्र
वणानन्तरं व्याप्तिज्ञानेनानुमितिरिति किञ्च सर्वत्र शाब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्वत्रानुमितिस्थले पटस्मर
णं कल्प्यं विना शाब्दबोध एव किं न स्वीक्रियते ॥ त्रैविध्यमनुमानस्य केवलान्वयिभेदतः द्वैविध्यं तु भवेद्व्या
प्तेरन्वयव्यतिरेकतः अन्वयव्याप्तिरुक्तैव व्यतिरेकिण्यथोच्यते अनुमानं त्रिविधम् केवलान्वयि केवलव्यतिरेकि अन्वय
व्यतिरेकि भेदात् तत्रासिद्धविपक्षः केवलान्वयी यथा ज्ञेयमभिधेयत्वादित्यादौ तत्र हि सर्वस्यैव ज्ञेयत्वाद्विपक्षासत्त्वं नतु
सर्वेषां धर्माणां व्यावृत्तत्वात् केवलान्वयप्रसिद्धिरिति चेन्न व्याहतत्वात् स्वस्य सर्वसाधारण्येन तस्यैव केवलान्वयित्वात् किंच वृ
त्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं तच्च गगनाभावादौ प्रसिद्धम् असत्सपक्षः केवलव्यतिरेकी यथा पृथिवी
इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादौ तत्र हि जलादित्रयोदशभेदस्य पूर्वमनिश्चितत्वात् निश्चितसाध्यवतः सपक्षस्याभावात्
सत्सपक्षविपक्षोऽन्वयव्यतिरेकी यथा वह्निमान् धूमादित्यादौ तत्र सपक्षस्य महानसादेः विपक्षस्य जलह्रदादेश्च सत्त्वादिति न
नु हि व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं का रीतिः तदर्थं व्यतिरेकव्याप्तिं निर्वक्ति साध्याभावव्यापकत्वं हेत्वभावस्य
यद्भवेत् साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः अस्यैवं बोधः येन सम्बन्धेन यद्रूपेण यद्व्यापकता धी

(margin, left: अत्यन्ताभावाप्रतियोगिसाध्यकः)
(margin, right: अगृहीतहेतुसहचारव्यतिरेकिसाध्यकः)
(margin, left: दृष्टान्तान्वयव्यतिरेकिसाध्यकः)

यत्सम्बन्धावच्छिन्नयद्धर्मावच्छिन्नं प्रति गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभाववत्त्वाज्ञानात् तत्सम्ब-
न्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिः इत्थं च घटत्वविशेषणतासम्बन्धेनेतरत्वव्यापकत्वं गन्धात्यन्ताभावे।
गृह्यते तत्र गन्धात्यन्ताभावाभावेनेतरत्वात्यन्ताभावः सिध्यति यत्र तादात्म्यसम्बन्धेनेतरव्यापकता गन्धाभावस्य गृ-
तत्रै ह्यते तादात्म्यसम्बन्धेनेतरस्याभावः सिध्यति स एवान्योन्याभावः न चात्र साध्याप्रसिद्धा पृथिवीतरभेदवतीत्यनुमितिर्न स्या-
त् विशेषणज्ञानाभावादिति वाच्यम् पृथिव्यामितरत्वात्ताभावे इति हि प्रथमानुमितिस्थले पृथिवीतरभेदवतीत्यनुमि-
तिः एवं घटत्वसंयोगसंबंधेन धूमं प्रति संयोगसम्बन्धेन वह्निव्यापकता गृह्यते तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्य-
भावेन जलहृदादे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिध्यति। अत्र च व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचार-
ज्ञानं कारणम् केचित्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते न तु व्यतिरेकव्याप्तिज्ञानमपि कारणम् यत्र व्यतिरेक-
सहचाराद्व्याप्तिग्रहस्तत्र व्यतिरेकीत्युच्यते न च व्यतिरेकिणि साध्याप्रसिद्धा पृथिवीतरभेदवतीत्यनुमितिर्न स्यात् विशे-
षणज्ञानाभावादिति वाच्यम् इतरभेदविशेष्यकाया एवानुमितेः स्वीकारात् घटादावेवेतरभेदः प्रसिद्धः न चात्र
मानेव यत्र पृथिवीत्वावच्छेदेनानुमितौ बाधकाभावात् तद्वच्छेदेन प्रसिद्धावपि नानुपपत्तिः एतत्तावच्छेदकावच्छेदेनानु।
पृथिवीत्व सामानाधिकरण्येन घटादौ इतरभेदसिद्धेः मितौ तत्सामानाधिकरण्येन सिद्धेरप्रतिबन्धकत्वात् साध्यप्रसिद्धिस्तु घटादावेव जाता पश्चात् पृथिवीत्वावच्छेदेन साध्यप्र-
तीतिर्वदन्ति अर्थापत्तेस्तु नैवेह प्रमाणान्तरतेष्यते व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः अर्थापत्तिः प्रमाणान्तरा-
मिति केचिन्मन्यते तथा हि यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीवितो गृहासत्त्वं च प्रत्यक्षादवगतं तत्र

स्वः

देवदत्तो दिवा न भुङ्क्ते दिवा भुञ्जानत्वे सति पीनत्वात् यो
यो न दिवा भुङ्क्ते स दिवाऽभुञ्जानत्वे सति पीनत्वान्नभवति

मु० व० ५२ शतवर्षजीवित्वाद्यनुपपत्त्या बहिः सत्वं कल्प्यते इति तदप्यनुमानेन गतार्थत्वान्नेष्यते तथाहि जीवित्वस्य बहिः सत्व यथा मा?प वासीचैत्रः
गृहसत्वान्यतरव्याप्यत्वेऽपि गृहे तदन्यतरसिद्धौ जायमानायां गृहसत्वबाधाद्बहिः सत्वमनुमितौ भासते एवं पीनो देवद
त्तो दिवा न भुङ्क्ते इत्यादौ पीनत्वं भोजनव्याप्यत्वावगमाद्भोजनं सिध्यति इतरबाधसहकाराद्रात्रिकीत्वं लभ्यते अभावप्रत्य
५२ क्षस्यानुभाविकत्वादनुपलम्भोऽपि न प्रमाणान्तरम् किं चानुपलम्भस्य हेतुत्वे ज्ञानाकरणकत्वात्तस्य ज्ञानस्य हेतुत्वे तस्याप्य
नुपलम्भापेक्षत्वेऽनवस्था एवं चेष्टापि न प्रमाणान्तरम् स्मृत्याः संकेतग्राहकत्वात् स्मारकत्वेन लिप्यादिसमशीलत्वाच्छब्द एवान्त
र्भावात् यद्यप्याप्यादिप्रत्यक्षजन्यमिति देवेति सुखं निरूपयति सुखं तु जगतामेव काम्यं धर्मेण जायते काम्यममि
लाषविषयः धर्मेणेति धर्मत्वेन सुखत्वेन कार्यकारणभाव इत्यर्थः दुःखं निरूपयति अधर्मजन्यं दुःखं स्यात्प्रतिकूलं
दुःखत्वेन सचेतसाम् अधर्मत्वेन कार्यकारणभाव इत्यर्थः प्रतिकूलमिति। दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकद्वेषविषय इत्यर्थः
इच्छां निरूपयति निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते इच्छा तु तदुपायेष्यादिष्टोपायत्वधीर्यदि इच्छा हि फलविष
यिणी उपायविषयिणी च फलं सुखं दुःखाभावश्च तत्र फलेच्छां प्रति फलज्ञानं कारणमत एव फलं स्वतः पुरुषार्थः स
भवति यज्ज्ञाते सत्स्वेच्छान्तितयेष्यते न तु पुरुषार्थ इति तल्लक्षणम् इतरेच्छानधीनेच्छाविषयत्वं फलत्वमित्यर्थः उपायेच्छां प्र
तीष्टसाधनताज्ञानं कारणम् चिकीर्षा कृतिसाध्यत्वप्रकारिकेच्छा तु या भवेत् कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रिया
विषयिणीच्छा चिकीर्षा पाकं कृत्या साधयामीति तदनुभवात् तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् चिकीर्षां प्र
ति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं च कारणम् अत एव वृष्ट्यादौ कृतिसाध्यताज्ञानाभावान्न चिकीर्षा बलवद ५२

द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका बलवद्द्विष्टसाधनताज्ञानं तत्र प्रतिबन्धकम् अतो मधुविषसंपृक्तान्नभोजने न चिकीर्षा
बलवद्द्वेषः प्रतिबन्धकस्तस्मै तद्द्वेषत्वं बलवद्द्वेषत्वं कस्यचिन्मते बलवदनिष्टाजनकत्वज्ञानं कारणमित्यर्थः कृतिसा
ध्यताज्ञानादिमतो बलवदनिष्टसाधनताज्ञानशून्यस्य बलवदनिष्टाजनकत्वज्ञानं विनापि चिकीर्षायां विलम्बाभावात् क(
स्यचिन्मते रत्यस्वरसो दर्शितः द्वेषं निरूपयति द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणम् दुःखोपायविषयकं द्वेषं प्रति ब
लवद्द्विष्टसाधनताज्ञानं कारणमित्यर्थः बलवदनिष्टसाधनताज्ञानं तत्र प्रतिबन्धकम् तेन नान्तरीयकदुःखजनके पाकादौ
न द्वेषः प्रयत्नं निरूपयति प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम् प्रवृत्तिनि।
वृत्तिजीवनयोनिप्रयत्नभेदात्प्रयत्नस्त्रिविध इत्यर्थः चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा मधुविषसंपृक्तान्नभोजना
दौ बलवदनिष्टानुबन्धित्वेन न चिकीर्षाभावात्प्रवृत्तिरिति भावः कृतिसाध्यताज्ञानादिव बलवदनिष्टाननुबन्धित्वज्ञानम
पि स्वतन्त्रान्वयव्यतिरेकात्प्रवृत्तौ कारणमित्यपि वदन्ति कार्यताज्ञानं प्रवर्तकमिति गुरवः तथा हि ज्ञानस्य प्रवृत्तौ जन
नीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति सा च कृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारकप्रकारकधीसाध्यत्वनियमा
त् चिकीर्षा हि कृतिसाध्यत्वप्रकारके ज्ञाने तत्र कृतिसाध्यत्वप्रकारस्तत्प्रकारकं ज्ञानं चिकीर्षायां तद्द्वारा प्रवृत्तौ च हेतुः न
त्विष्टसाधनताज्ञानं तत्र हेतुः कृत्यसाध्येऽपि चन्द्रमण्डलानयनादौ प्रवृत्त्यापत्तेः कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न
तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात् न च द्वयोरपि हेतुत्वं गौरवात् । न च तन्मतेऽपि मधुविषसंपृक्तान्नभक्ष
णे चैत्यवन्नैव प्रवृत्त्यापत्तिः कार्यताज्ञानस्य सत्त्वादिति चेन्न स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्य प्रवर्त्त ऋतुमितिसप्तम

कृतिसाध्येष्टसाधनत्वज्ञाने :=२

स्वविशेषण सिंचनवर्तमानः प्रकृष्टः तद्विशेषणं कामना कामना विशिष्टकालज्ञो स्यादि तद्धर्मा पदेन तत्संबन्धः तत्सज्ज्ञानं। पाको मत्कृतिसाध्यः मत्कृतिं विना असत्त्वे सति यदि इष्टसाधनत्वात्

एतत्साधकाद्वे

शुक
५३

कलात् कामेत्रियागपाकादौ कामनाया विशेषणत्वम् ततश्च बलवदनिष्टाननुबन्धिकाम्यसाधनताज्ञानेन कार्यताज्ञान
म् ततश्च प्रवृत्तिः इष्टसाधनतेनेत्र प्रवर्त्तते, स्वर्गादौ कामनायाः स्वरूपविशेषणत्वाभावात् निषेधे च भोजनादिकं स्वरूपविशेषणे
नेव यत्नो चाद्रियतां तदधीनकृतिसाध्यताज्ञानात्तत्र प्रवृत्तिः न तु तदपेक्षया लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनताविषयक
कार्यताज्ञानमेवास्तु हेतुत्वमस्तु बलवदनिष्टाननुबन्धीष्टं च इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं बलवद्द्वेषविषय
दुःखाजनकत्वं वेति चेन्न इष्टसाधनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात् साध्यत्वसाधनत्वयोर्विरोधात् असिद्ध
स्य साध्यत्वं सिद्धस्य च साधनत्वम् न चैकमेकैकदा सिद्धमसिद्धं चेति ज्ञायते तस्मात्कालभेदात् उभयं ज्ञायत इति मैवम्
लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यताज्ञानस्य हेतुत्वात् न च साध्यत्वसाधनत्वयोर्विरोधः यदा
कदाचित्साध्यत्वसाधनत्वयोरविरोधात् एकदा साध्यत्वसाधनत्वयोश्च ज्ञानात् न वीनास्तु ममेदं कृतिसाध्यमिति ज्ञानेन
प्रवर्त्तकत्वम् अनागतेनस्य ज्ञातुमशक्यत्वात् | किं तु यादृशस्य स्वस्य कृतिसाध्यं यदृष्टं तादृशत्वं स्वस्य प्रतिसन्धाय तत्र प्रवर्त्तते
तेनौदनकामस्य तत्साधनताज्ञाने वृत्तेस्तदुपकरणवतः पाककृतिसाध्यता दृष्टा सादृश्यमिति प्रतिसन्धाय पाके प्रवर्त्तत इ।
त्याहुः तन्न सकलजिनलिप्सादिप्रवृत्तौ योगेनैकाम्यादिदिनात्संभोगादौ च तदभावात् इदं तु बोध्यम् इदानीमिष्टसाधन
ताविज्ञाने कृतिसाध्यताज्ञानं च प्रवर्त्तकत्वम् तेन भाविविधौ वर्जस्ये बालस्य न प्रवृत्तिस्तदानीं कृतिसाध्यताज्ञानात् एवं तत्स्य
भोजनेन प्रवर्त्तते तदानीमिष्टसाधनताज्ञानात् प्रवर्त्तते च राघवस्य चिन्तितविषभक्षणे तदानीं बलवदनिष्टाननुबन्धित्वज्ञा
नात् न चास्तिकस्यागम्यागमने शत्रुवधादिष्विष्टतो कथं बलवदनिष्टाननुबन्धित्वग्रहदिने इष्टसाधनताज्ञानादिति वाच्यम्

उत्कटरागादिना नरकसाधनताधीनिरोधानात् इष्टसाधनताज्ञानाभावाच्च चिकीर्षाप्रवृत्ती किं त्विष्ट
साधनताज्ञानादिच्छामात्रे कृतिश्च प्रवृत्तिरूपा वा ध्यानेन जीवनयोनियत्नसाध्यप्राणपञ्चकसंचारेण प्रवृत्तिः इत्थं च सा
वनकत्वाच्च मोक्षाहेतुविचारयमर्थः इत्थं च विश्वजिताद्यनेतरस्मादेव स्वर्गफलं न श्रूयते तत्रापि स्वर्गः फलं कल्प्यते तत्तु
रः सर्वाश्रयामीति स्यादेव इष्टत्वमतेः प्रवृत्तिः कथम् | न चाग्निहोत्रादिकं वस्तलोकादिप्राप्तिः प्रत्यवायाभावो वा फलमि
तिवाच्यम् तथा सति कामावनिरस्तवान्यापत्तेः कामनाभावे कारणतापत्तेश्च इत्थं च यत्र फलश्रुतिस्तत्रार्थवादः न.४
रमिति चेन्न ग्रहणाग्रहणयोर्नित्यत्वनैमित्तिकत्वयोरिव भरणश्राद्धे काम्यत्वनैमित्तिकत्वयोरिव नित्यकाम्यत्वयोरप्यवि
रोधात् न च कामनाभावे करणतापत्तिः स्विकालस्वर्गकामदृष्टिविकामनासद्भावस्यैव कल्पनात् न च वेदबोधितकार्य
ताज्ञानात्प्रवृत्तिरिति चेन्न इष्टसाधनत्वमज्ञात्वा तादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेरसम्भवात् यत्रापि पितृप्रीत्यादि
फलमिति तत्रापि कामनाभावे करणतापत्तेस्तौल्यात् कामनाकल्पने तु अर्थवादिकं फलमेव रात्रिसत्रन्यायात् कल्प्य
तामन्यथा श्रुतहानापत्तेः तेनात्र स्वनिष्ठत्वाद्याज्ञेयत्वं वाद्यस्यममन्तत्र एवं सन्यासपापसते येन सततं शंसितव्रताः वि
धूतपाप्मानो यान्ति ब्रह्मलोकमनामयम् एवं श्राद्धादावप्युक्तश्राद्धं पितृभ्यः प्रीतिमावहत् इति प्रीत्यादिकमेव फलम
स्तु न च पितृप्रीतेः कथं फलत्वाधिकरणत्वादिति वाच्यम् गयाश्राद्धादौ विरोधस्य पत्त सम्बन्धे नैव फलजनकत्वस
कविकल्पनात् अत एवाक्षयास्तु दर्शितफलमनुष्ठानवीर्यस्वर्गादिरितिपितृणां चक्रत्वेन तृप्तस्वर्गादिः फलम् यावन्नित्य
नैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफलजनकत्वात् | पञ्चाग्निविद्याप्रवृत्तिश्चानमभवति नहि नित्यस्य खण्डः साभाववत्

पितृप्रीतेः
श्राद्धफल
त्वादेव =

नञ्याद्यर्थाभावेति प्रत्यवायप्रागभा
साभावे २ वस्याभावः २
प्रागभाव

मु.व. त्वतः प्रकृष्टार्थः न चानन्तसाधनत्वे प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेदित्थम् यथाहि नित्ये कृते प्रत्यवायाभावस्तिष्ठ।
५५ ति तदभावे तदभावः एवं प्रत्यवायाभावसत्त्वे दुःखप्रागभावसत्त्वे तदभावे तदभाव इति योगक्षेमसाधारणकारणताया
दुःखप्रागभावं प्रत्यपि तुल्यत्वात् एवमेव प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति न च नञ्कलञ्जं भक्षयेदित्यत्र वि
ध्यर्थे कथं नञर्थान्वयः इष्टसाधनताभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुमशक्यत्वादिति चेन्न नत्र बाधादि
ष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः किन्तु बलवदनिष्टाननुबन्धित्वमात्रं तदभावश्च नञा बोध्यते अथवा बलवद
निष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यत्वं विध्यर्थः तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेष्यवति वि।
शेषणाभावे विश्राम्यति ननु श्येनेनाभिचरन्यजेतेत्यादौ कथं बलवदनिष्टाननुबन्धित्वमर्थः श्येनस्य मरणानु
कूलव्यापारस्य हिंसासाधनत्वेन नरकसाधनत्वात् न च वैधत्वान्न निषेध इति वाच्यम् अभिचारे प्रायश्चित्तोपदेशात्
न च मरणानुकूलव्यापारमात्रं यदि हिंसा तदा खड्गकारस्य कूपकर्तुश्च हिंसकत्वापत्तिः गललग्नान्नभक्षणजन्यमरणे
प्यात्मघातित्वापत्तिश्चेति वाच्यम् । मरणोद्देश्यकत्वस्यापि विशेषणत्वात् अत एव कूपमनीतिलाभ्युद्देश्येन न हिंसात्वमन्यो
द्देश्यकहिंसनादावहत्याप्रायश्चित्तस्य वाचनिकं प्रायश्चित्तमिति चेन्न श्येनवारणाय द्वेषोद्भावकत्वेन विशेषणत्वात् अ
त एव काश्यां मरणोद्देश्यकृतशिवपूजादेरपि न हिंसात्वम् न च साक्षान्मरणजनकस्यैव हिंसात्वं श्येनस्तु न तथा।
किन्तु तज्जन्यापूर्वमिति वाच्यम् खड्गाघातेन जातस्य व्रणपाकपरंपरया मृतेर्हिंसात्वानापत्तेः अभिचारे प्रायश्चित्तो
पदेशस्तु नैमित्तिककर्मान्तरम् वर्तितादिविधायकनत्रसाध्यत्वं वेदेन तत्सावनात्यकत्वेनाश्रयस्य साक्षत्ता हिंसेति। ५५

स्यादिकमपि एतेन व्याख्यातम् । केचित्तु श्येनस्य हिंसाफलत्वेन तन्मरणं तेन श्येनजन्यत्वविहिततानादिरूपा हिंसाभिचारपदा
र्थस्तस्य च पापजनकत्वमतः श्येनस्यैव न्यायापानजनकत्वेऽपि अग्रिमपापं प्रतिसन्धाय सन्तो न प्रवर्तन्ते इत्याहुः । आचार्यास्तु
आप्ताभिप्रायो विध्यर्थः पाकं कुर्यादित्यादावाज्ञादिरूपेच्छा वाविवक्षितत्वविहितेष्टमात्रस्येच्छावाचित्वे लाघवात् । एवं च स्वर्गकामो य
जेतेत्यादौ यागः स्वर्गकामकृतिसाध्यतयाप्तेष्ट इत्यर्थः । ततश्चाप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमाय प्रवर्तते । कलञ्जभक्षणे
दोषदर्शनाभावान्न प्रवर्तते । यत्तु वेदपौरुषेयत्वेनाभ्युपेतं तत्प्रति विधिरेव नावद्यमे रक्षकृतिकुर्मो यः तु योगो मानम् । न च कर्तु
रस्मरणं बाधकम् । कपिलकणादादिकमारभ्याद्यपर्यन्तं कर्तुरस्मरणस्यैव प्रतीयमानत्वात् । अन्यथा स्मृतीनामप्यकर्तृक
त्वापत्तेः । तत्रैव कर्त्रस्मरणमस्तीति चेद्वेदेऽपि कर्त्रास्मिज्ञप्तिरेतस्मादित्यादिकर्तृस्मरणमस्त्येव । एवं प्रतिमन्वन्तरं चैषा श्रुतिरन्या
विधीयते इत्यपि द्रष्टव्यम् । स्वयम्भूरेष भगवान्वेदो गीतस्त्वया पुरा । शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः इति वेदस्य तु
तिमात्रम् । न च पौरुषेयत्वे भ्रमादिसम्भवादप्रामाण्यं स्यादिति वाच्यम् । नित्यसर्वज्ञप्रणीतत्वेन निर्दोषत्वात् । अत एव तदुक्तत्वा
दस्य भ्रमादिसम्भवाच्च कपिलादेरपि कर्तृत्वेन वेदस्य किंत्ववर्णानामेवानित्यत्वस्य वक्ष्यमाणत्वात्तदुत्तरानन्तरमभूद्वेदस्यानि
वदन्ति त्यत्वमिति । उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् । निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधनताधियः ५१ उपादानस्य समवायिकारण
स्य प्रत्यक्षं प्रवृत्तौ कारणमिति । निवृत्तिरिति द्विष्टसाधनताज्ञानस्य द्वेषस्य साधनविषयकनिवृत्तिं प्रति जनकत्वमन्वयव्यतिरे
काभ्यामवधारितमिति भावः । यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् । जीवनयोनियत्नो यावज्जीवमनुवर्तते स चातीन्द्रियः
तत्र प्रमाणमाह शरीरे प्राणसञ्चारकारणं परिकीर्तितम् । प्राणसञ्चारे हि अधिकः श्वासादिः प्रयत्नसाध्यः । इत्थं च प्राणसञ्चा

सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम् ४

तत्र कोऽसौ नैमित्तिकार्थस्तं दर्शयति नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु द्रवत्वमिति वह्निपदं तेजोऽर्थकं तथाच तेजःसंयोगजं नैमित्तिकं द्रवत्वम्

मा॥ रूपत्वसर्वसमयुत्वसाधारणादनुमानात् प्रमाणघटत्वमबाधाच्चातीन्द्रियघटत्वसिद्धिः सएव जीवनयोनिर्यत्नः गुरुत्वं निरू-
पयति अतीन्द्रियगुरुत्वं सामान्यविशेषादिद्वयेभवेत् अनित्येतदनित्यस्मान्नित्येनित्यमुदाहृतम् तदेवासमवायिकारणत्वना
त्वत्वकर्माणि अनित्येद्व्यणुकादौतद्गुरुत्वमनित्यं नित्ये परमाणौ नित्यं गुरुत्वमित्यर्थः एवमन्ते तद्गुरुत्वमसमवायि असमवा-
यिकारणम् पतनेत्याद्युपतनेरूपार्थः द्रवत्वं निरूपयति सांसिद्धिकं द्रवत्वसलिले द्वितीयं क्षितितेजसोः द्रवत्वं द्विविधं सांसि-
द्धिकं नैमित्तिकं चेत्यर्थः द्वितीयं नैमित्तिकम् परमाणौ जले नित्यम् अन्यत्रानित्यमित्युक्ते जलपरमाणौ द्रवत्वं नित्यमित्यर्थः अ-
न्यत्रपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यं क्षितितेजसोः नैमित्तिकं पृथिव्यां च नैमित्तिकं द्रवत्वम् तत्र सुवर्णादि तेजसि
जलसिद्धत्वजलभृत्पृथिव्यां च वह्निसंयोगजं स्निग्धं द्रवत्वमन्यत्र नैमित्तिकं स्यन्दनहेतुरिति असमवायिकारणमित्यर्थः
स्नेहः संस्कारसंयोगविशेषेण द्रवत्वं स्यन्दनहेतुरिति नित्यं द्रवत्वेन तु लवणादीनां संग्रहः स्नेहं निरूपयति स्नेहो
जलेसनित्याणावनित्योवयविनाशो जलरूपि जलएवेत्यर्थः असौ स्नेहः तत्रपृथिव्यामपि तैले तु स्नेहोऽप्युत्कर्षात् न
चामेजलीयः तथामतिरस्नप्रतिकूलसंस्कारस्य तैले जलापेक्षया अग्नेरनुकूलता ५ तत्तत्कथम् तैलीय
स्नेहमानत्वे सोऽपि जलीयएवतस्य प्रकृष्टत्वाद्धेतोरनुकूल्यम् अपकृष्टत्वे हरिजलत्वं तद्विनाशयतीति भावः संस्कारं
निरूपयति संस्कारभेदो वेगोऽथस्थितिस्थापकभावने वेगस्थितिस्थापकभावनाभेदात्संस्कारस्त्रिविध इत्यर्थः वेगमात्र
तत्वेगस्थात्मजो वेगजः क्वचित् कर्मजवेगजन्मभेदाद्वेगो द्विविध इत्यर्थः शरीरादौ च नोदनाजनितेन कर्मणा वेगो जन्य
ते तेन च स्वतन्त्रकर्मणा नाशात्तदुत्तरकर्म एवमग्न्यादि विनाचवेगकर्मणः कर्मस्थितिवन्धकत्वात्तद्वेकमनाशादुत्तरकर्मा

त्वनिष्ठत्वस्यात् पश्चाद्वेगवता कपालेन जनिते द्वारे वेगो जन्यते स वेगजो वेगः स्थितिस्थापकसंस्कारः क्षितौ केचि
त्वतस्येपि अतीन्द्रियोऽसौ विशेषः क्वचित्स्पन्देपि कारणम् ५९ आकृष्टशाखादीनां परित्यागे पुनर्गमनस्य स्थितिस्थापक।
साध्यत्वात् केचिदिति चतुर्षु क्षित्यादिषु स्थितिस्थापकं केचिन्मन्यन्ते तत्र प्रमाणमिति भावः असौ स्थितिस्थापकः क्वचिदाकृ
ष्टशाखादौ । भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् भावनाख्येति तस्य
संस्कारस्योपेक्षात्मकज्ञानात्संस्कारानुत्पत्तेरुपेक्षानात्मक इत्युक्तं तस्य शयानसंस्कारानुत्पत्तेर्निश्चय इत्युक्तं तेनोपेक्षान्य
निश्चयत्वेन संस्कारं प्रति हेतुत्वमिति भावः ननु स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वे तेनोपेक्षादिस्थले न स्मरणम् इत्थं च सं
स्कारं प्रति ज्ञानत्वेन हेतुतास्त्विति चेन्न विनिगमनाविरहेपि संस्कारं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् किंचो
पेक्षास्थले संस्कारकल्पनायां गुरुत्वात्संस्कारं प्रति उपेक्षान्यत्वेन हेतुतायाः सिद्धत्वात् तत्र प्रमाणं दर्शयति स्मरणेत्यत्र
भिज्ञायामप्यस्य हेतुत्वमुच्यते असौ संस्कारो यतः स्मरणं प्रत्यभिज्ञां च जनयति अतः संस्कारः कल्प्यते विनाव्यापारं स्वो
त्पन्नस्य स्मरणादिजननासामर्थ्यात् तस्य व्यापारान्तराभावे कारणत्वासम्भवात् न च प्रत्यभिज्ञायां तु न संस्का
रस्य हेतुत्वेन प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम् अप्रयोजकत्वात् परे तु दृढसंस्कारस्येदा।
तुतापेक्षयास्तु स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यतामित्यपि वदन्ति अदृष्टं निरूपयति ॥ धर्माधर्मावदृष्टं स्याद्धर्मः स्व
र्गादिकारणम् ॥ स्वर्गादीति स्वर्गादिसकलसुखानां सकलसाधनीभूतशरीरादीनां च साधनं धर्म इत्यर्थः तत्र प्रमाणं दर्श
यति सुमहः ॥ यागादिजन्यत्वाभावाद्व्यापारः स्वर्गकालीनः यागादिव्यापारत्वेन धर्मः कल्प्यते अन्यथा यागादीनां चिर

संस्कारस्याप्रत्यभिज्ञानुदयापद्दुर्द

शु.व. विनष्टतया निर्व्यापारतया चावत्कालीनत्वेन भाविस्वर्गजनकत्वेनुपपत्तेः तदुक्तमाचार्यैः चिरध्वस्तं फलायालं न कर्मातिशयं विना
५६ इति नच यागाद्युत्पत्त्यव्यापारः स्यात् नच प्रतियोगितद्ध्वंसयोरेकत्राजनकत्वे सर्वत्र तथात्वे मानाभावात् नच तत्त्वेफ
लानवच्छिन्नजन्यतेचरमफलव्याप्यत्वेनाशकत्वाज्ञतयात्वे विनिगमनाविरहः कालविशेषस्य सहकारित्वादित्यत आह यागा
द्यनेति यागात्स्नानत्वादिस्वर्गजनकत्वे तेनापूर्वसंयोगाद्यैः सानाव्यापारत्वमपेक्षैकमपूर्वं कल्प्यते लाघवादि
तिभावः नच ध्वंसोपि न व्यापारोस्तु नच निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यम् अनन्यथासिद्धनियत
पूर्ववर्तित्वस्य तत्रापि सत्त्वात् अव्यवहितत्वस्य वर्णितत्वे हि ध्वंसः संयोगादेः कारणत्वेन तु समवेतकार्यकालवृत्तित्वमिवा
समवायिकारणस्य कारणत्वे कालविशेषस्य सहकारित्वात् नातिप्रसंग इत्यत आह कर्मनाशाजलस्पर्शादिनाना
शस्त्वसौ मतः यदि हि अपूर्वं न स्यात् तदा कर्मनाशाजलस्पर्शादिना नाशस्य धर्मस्य न स्यात् नहि तेन यागादेर्नाशः प्र
तिबन्धो वा कर्तुं शक्यमेतस्य पूर्वमेव नष्टत्वादिति एतेन देवताप्रीतिरेव फलमित्यपास्तम् गङ्गास्नानादेः सर्वत्र देवता
प्रीतिरसम्भवात् देवतायाश्चेतनत्वेपि तत्प्रीतेरवहेद्यत्वात् प्रीतिः सुखं स्वरूपं तेन विष्णुप्रीत्यादेरसम्भवात्
जन्यसुखादेरन्यत्राभावात् तेन विष्णुप्रीतिजनकत्वेन परमिमतत्त्वसंगादेरेव विष्णुप्रीतिशब्देन लक्ष्यते अधर्मो नरकादीनां
हेतुर्निषिद्धकर्मजः नरकदुःखादिहेतुकदुःखानामानारकित्वादीनां साधनमधर्मदुःखार्थः तत्र प्रमाणमा
ह प्रायश्चित्तादिनाश्योसौ जीववृत्तिरिमौ गुणौ इह यदि हि अधर्मो न स्यात् तदा प्रायश्चित्तादिनाश्यत्वं न स्यात् वदिते
न च्छन्दहृदनादीनां नाशः प्रतिबन्धो वा विनाशशङ्क्वेन तस्य पूर्वं विनष्टत्वादिति भावः जीवेति ईश्वरे धर्माधर्मौ ५६

46

भावादिति भावः इमौ लवाभ्यन्तानन्यौ ज्ञानादसिद्धिनश्यतः इमौ धर्माधर्मौ नाशनेति श्रुतौ ज्ञानेनाकृतेऽपि स्वकृतत्व
कृतकर्मणोन फलाद्यालमिति भावः ज्ञानादपि पापिनाभोगपरिग्रहः । ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वम् नाभु
क्तं क्षीयते कर्म कल्पकोटिशतैरपि इति वचनविरोधात् इत्थं च तत्त्वज्ञानिनो ऽदृष्टेति क्वायसदेन सकलकर्मणां भोगेन ह
य इति चेन्न तत्र भोगस्यैव स्वबाधितनाशकोपलक्षकत्वात् कथमन्यथा प्रायश्चित्तादिना कर्मणां नाशः तदुक्तं ज्ञाना
दी ग्निः सर्वकर्माणि भस्मात्कुरुते वा सत्कर्माणीति ननु तत्त्वज्ञानिनस्तादृशशरीरावस्थानेऽप्यलेङ्गः नादिकं च न स्यात्
ज्ञानेन सर्वेषां कर्मणां नाशादिति चेन्न प्रारब्धेतरकर्मणामेव नाशात् तच्छरीरभोगजनकं यत्कर्म तस्यारब्धत्वं तद्भिन्ना
नामेव नाशकत्वमिति वचनमिति शब्दं निरूपयति शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः कण्ठसंयोगादिजन्यावर्णा
स्तकाद्यामता: सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते नभोवृत्तिराकाशसमवेतः इत्यस्य शब्दस्यापरत्वादाह
श्रोत्रेति ननु भेर्यादिदेशावच्छिन्नशब्दः श्रोत्रे कथमुत्पत्तिरत आह वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता आद्यशब्दसर्व व्यापकः॥
आद्यशब्देन दिक्षु दशदिक्ष्ववच्छिन्नोऽन्यः शब्दस्ततैव शब्देन जन्यते तेनैवापरस्तद्व्यापक एवं क्रमेण श्रोत्रदेशेऽन्यशब्दो जन्यते इति कदम्बगोल
कन्यायादुत्पत्तिः कस्यचिन्मते । आद्यशब्दाद्दशदिक्षु दश शब्दा उत्पद्यन्ते इति भावः अस्मिन्मते कल्पनागौरवादुक्तं कस्य
चिन्मते इति ननु शब्दस्यानित्यत्वादुत्पत्तिकथनमसङ्गतमत आह उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता शब्दानामुत्प
त्तिविनाशशालित्वादुत्पत्तिकथनमसङ्गतमत आह) इति मानमित्यर्थः ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानात् ह्रस्वा
मानित्यत्वम् इत्यत आह उत्पादविनाशबुद्धिः स्वेनेत्यत आह सोऽयं ककार इति बुद्धिस्तु साजात्यमवलम्बते तदेवौषधमिवा

दशदिगवच्छिन्नशब्देन=

पु॰ दैःसजातीयेपिदर्शनात् तस्मादनिष्ट एवेति निष्कर्षः सर्वमतं हि वः १६८ नवप्रत्यभिज्ञानस्य सजातीयत्वं विष
वं॰ यानतानद्युत्वभेदोविषयः इत्यप्रतीतिविरोधात् इत्यत्रह यश्च पित्र्याऽप्रमत्तमिति तत्सजातीयसाधमितिव
भमित्यात्करहरहात्वभाह तदेवेति यद्धिपथममेन वृत्तेन तदेवोद्धं मयापि वृतमित्यादिदर्शनादिति भावः ॥
५७ इति श्रीमहामहोपाध्यायविश्वनाथपञ्चाननभट्टाचार्यविरचिता सिद्धान्तमुक्तावली ॥ शु
भम् ॥ तर्कोपारावारवह्निइन्दुवर्षे कार्त्तिके ... नामसम्वत्सरे सिद्धान्तनामावली लिलिखे ... जीवनो
मौक्तिकामाम्

न्यायाः

वीचीतरंग	ब्राह्मणश्रमण	राजपुत्र	घट्टकुटीप्रभातः	गोमयपायसीय
कदम्बगोलक	स्थालीपुलाकः	खलेकपोत	अन्धगोलाङ्गूलः	पिष्टकपाटपेषण
लासपथमतिः	स्थूणानिखनन	तिलतरग	सामन्यगज	देहलीदीप
तक्रकौण्डिन्यः	सूचीकटाह	कौण्डव	प्रधानमल्लनिबर्हण	सामिष्यदृ
[illegible]	काकतालीय	काकाक्षिगोलक	काकोलूक	अरुन्धतीस्थूला
		मण्डूकप्लुति	उष्ट्रलगुड	गुडजिह्विका

घलानस्पेवलिः

इति न्यायाः ४७